

श्रीगणेशायनमः।। गोदानीरस्थगोलाभिधपुरवसतिः पार्थदेशेकभूषासंज्ञातेनस्यरीकाव्यरचितःग्रभिनपां
गंधपुद्यानवद्यां।। शश्वद्विश्वोपकृत्येविशदतरजयादेवविद्विश्वनाथोग्रंथोयंग्रथभिन्नायरुगणितविदामग्रगण्यो
प्यगर्वः।।१।। निर्विघ्नग्रंथ्यसमाप्त्यर्थंमंगलमाचरन् चिकीर्षितंप्रजातीति।। प्रणम्यकरंबमथोदिवाकरंगुरानंतस्य
तथापदांबुजं श्रीनीलकंठोविविनक्तिसूक्तिभिस्तत्ताजिकंसरमनःप्रसादकृत १ श्रीनीलकंठःतत्ताजिकंतत्सूक्ति
र्यत्कंताजिकंसूक्तिभिः नानाछंदोभिर्विविनक्तिप्रकटीकरोति कथंभूतंसरिमनःप्रसादकृत एतद्ग्रथावलोकनेनहि
तमनःप्रसन्नंभवतीत्यर्थः किंकृत्वाहरंबंगणपतिंप्रणम्य दिवाकरंसूर्यंप्रणम्य अनंतदेवंतत्पदांबुजंप्रणम्य अथ
द्वादशराशिस्वरूपमाह पुमानितिपुमान्पुरुषराशिः चरश्चरसंज्ञः अग्निरग्निराशिः स्थिरःस्थिरांगः चतुष्पाच्चतु
ष्पदांगः रक्तःरक्तवर्णः उष्णःउष्णस्वभावः अतिरवःसूरक्षेत्रः ऋक्षःपर्वतचारी। उग्रःक्रूरः पीतःपीतवर्णः दिनेबली श्रीः
बली। प्राक्पूर्वदिक्स्वामी। विषमोदयः अल्पसंगप्रजाः अल्पस्त्रीसंगः अल्पप्रजश्चरूक्षः कांतिरहितः नृपःक्षत्रियवर्णः समः २
समांगः अजःमेषः एवंगुणविशिष्टोज्ञेयः। अथवृषराशिर्द्विवर्णः रक्तवर्णः पीतवर्णश्च। मेषासंज्ञधन्विनामेववर्षाद्वयंसक्त
कृतःसमरसंज्ञेनोक्तत्वात्।। अथवृषस्वरूपमाह।। वृषइति।स्थिरःस्थिरराशिसंज्ञः स्त्रीस्त्रीराशिः क्षितिःभूमिराशिः
शीतिःशीतलस्वभावः रूक्षःकांतिरहितः। याम्यदक्षिणदिक्स्वामी। सुभूःसुष्ठुभूमिचारी। वसुःवायुप्रकृतिः निशाचरबली चतुष्पात्

श्वेतःशुभ्रवर्णः। मरुच्चरक्षुः। विषमोदयः। मध्यप्रजासंगः। मध्यमप्रजः। मध्यमस्त्रीसंगश्च। शुभः। सौम्यः। वैश्यवर्णः। श्रृंगांगः। मे
षसिंधुधन्विनामेवद्विरंगत्वमुक्तं। अथातुलराशिः। बोध्यः। अथमिथुनराशिः द्वंद्वंमिथुनराशिर्द्वंद्वकथयापश्चिमदिक्स्वा
मी। वायुराशिः। शुक्लकांतिः। रूपितवर्णइत्यर्थः। द्विस्वभावः। चरस्थिरस्वभावात्मकइत्यर्थः। तत्रापिपूर्वंस्थिरं। उत्तरंच
रमित्यर्थः। उक्तंचभट्टोत्पलेन। चरराशौविपरीतामिश्रंवाच्यंद्विमूर्तयेस्थिरवत्प्रथमेऽर्द्धेस्यादपरेचरराशिवत्सर्वमिति। विषमोदयः। उष्णः। म
ध्यमप्रजः। मध्यमस्त्रीसंगश्च। वनचारी। श्यामवर्णः। मरुच्चरक्षुः। विष्णुः। दिवाबली। क्रूरः। श्रृंगांगः। अथकर्कः कुलीरः कर्कटराशिः। एतादृक्। ब
हुस्त्रीबहुसंगः। बहुप्रजश्च। वरसंज्ञः। स्त्रीराशिः। श्वेतरक्तवर्णः। निःशब्दः। सौम्यः। कफप्रकृतिः। विष्णुः। जलराशिः। जलचरः। समोदयः।
ब्राह्मणवर्णः। रात्रिबली। उत्तरदिक्स्वामी। श्रृंगांगः। अथसिंहः पुमान्हरिः सिंहः। एतादृशः पुरुषराशिः। स्थिर
संज्ञः। अग्निराशिः। दिवाबली। पीतवर्णः। कांतिरहितः। पित्तप्रकृतिः। उष्णः। पूर्वदिक्स्वामी। दृढांगः। चतुष्पाच्चरणः। समोदयः।
मरुच्चरक्षुः। अल्पस्त्रीसंगोऽल्पप्रजश्च। पर्वतचारी। क्षत्रियवर्णः। क्रूरः। धूम्रवर्णः। अयंराशिर्द्विवर्णः। पीताधूम्रश्च। अ
थकन्याराशिः कन्यास्वरूपंतादृशं। पिंगलवर्णः। द्विचरणः। स्त्रीराशिः। द्विस्वभावः। वरस्थिरस्वभावात्मकइत्यर्थः। दक्षि
णदिक्स्वामिनी। रात्रिबली। वायुप्रकृतिः। शीतलस्वभावः। समोदयः। भूमिराशिः। खंडितश्चरक्षुः। शुद्धभूमिचारिणी।
वैश्यवर्णः। कांतिरहिता। अल्पपुंसंगोऽल्पप्रसवाच्च। सौम्यराशिः। श्रृंगांगः। अथतुलाराशिः पुरुषराशिः। वरः। चित्रवर्णः।
नानाविधवर्णः। समोदयः। उष्णः। पश्चिमदिक्स्वामी। वायुराशिः। विकृणः। रात्रौनिशाचरक्षुः। वनचारी। स्वल्पप्रजाः। स्वल्पस्त्रीसंगश्च।

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

शूद्रवर्णः क्रूरः दिवाबली द्विस्वरणः समांगः श्लथांगः अथ वृश्चिकः स्थिरसंज्ञः शुभ्रवर्णः स्त्रीराशिः जलराशिः उत्तरदिक्स्वामी रात्रिबली निःशब्दः बहुचरणः कफप्रकृतिः समोदयः जलचरः बहुस्त्रीसंगः बहुप्रजासोम्यः सिंहाणतनुः ब्राह्मणवर्णः वृश्चिकराशिः एतद्राशिजाः ज्ञेयाः श्लथांगः अथधनुःस्वरूपमाह पुरुषराशिः रुवर्णकांतिः पर्वतचारी समोदयः महाशूद्रः दिवाबली पूर्वदिक्स्वामी दृढांगः कांतिरक्तपीतवर्णः क्षत्रियवर्णः उल्लः पित्तप्रकृतिः अल्पप्रजाः अल्पस्त्रीसंगश्च वरस्थिरराशिस्वभावात्मकश्च द्विस्वरणः तत्रापि पूर्वार्द्धं द्विपदत्वं उत्तरार्द्धं चतुःपदत्वं ज्ञेयं तदग्रे वक्ष्यति अग्निराशिः क्रूरः द्विवर्णः सुवर्णवर्णः पीतवर्णः अथ मकरराशिः मृगोमकरराशिः वरसंज्ञश्च भूमिराशिः अर्धशब्दः दक्षिणदिक्स्वामी स्त्रीराशिः पिंगलवर्णः कांतिरक्तः सोम्यः भूमिचारी शीतलस्वभावः स्वल्पप्रजाः स्वल्पस्त्रीसंगश्च वातप्रकृतिः रात्रिबली राशिपूर्वार्द्धं चतुःपदत्वं उत्तरार्द्धं जलचरत्वं ज्ञेयं विषमोदयः वैश्यवर्णः श्लथांगः अथ कुंभराशिः चरणहीनः पुरुषराशिः दिवाबली मध्यस्त्रीसंगः मध्यमप्रजाप्रसवश्च स्थिरराशिः चित्रवर्णः वनचारी वायुराशिः त्रिकणः उल्लः अर्द्धचरः समवातपित्तकफप्रकृतिः शूद्रवर्णः पश्चिमदिक्स्वामी विषमोदयः क्रूरः श्लथांगः अथ मीनः चरणहीनः स्त्रीराशिः कफप्रकृतिः जलराशिः रात्रिबली शूद्ररक्तः पिंगलवर्णः स्थिरस्वभावात्मकः जलचरराशिः त्रिकणः अत्यंतस्त्रीसंगः अत्यंतप्रसवश्च ब्राह्मणवर्णः सोम्यः उत्तरदिक्स्वामी विषमोदयः श्लथांगः एवं राशीनां स्वरूपमुक्त्वा इदानीं राशिमित्रविभागमाह १२ स्थूलराशिजलराश्योर्वृषमीनलग्ने एवं अग्निराशिवायुराश्योर्मेषतुलालग्ने एवं अग्निराशिवायुराश्योर्मेषमिथुनलग्ने एवं अग्निराशिवायुराश्योर्मेषकुंभलग्ने एवं पृथ्वीराशिजलराशीनां वृषकर्कलग्ने एवं पृथ्वीराशिजलराशीनां वृश्चिकमीनलग्ने एवं पृथ्वीराशिजलराशीनां मकरकर्कलग्ने एवं पृथ्वीराशिजलराशीनां मकरमीनलग्ने एवं पृथ्वीराशिजलराशीनां वृषवृश्चिकलग्ने एवं पृथ्वीराशिजलराशीनां मकरवृश्चिकलग्ने एवं पृथ्वीराशिजलराशीनां वृषमकरलग्ने एवं पृथ्वीराशिजलराशीनां वृषमीनलग्ने एवं पृथ्वीराशिजलराशीनां वृषकर्कलग्ने एवं पृथ्वीराशिजलराशीनां वृष

शतिः ततः भ्रः तेन गुणितोयः समासगणः वर्षगणः तस्मात्खवेदाप्त४० घटीयुक्तः चत्वारिंशदूनात् घट्यादियल्लब्धं तेन चतुर्थो
शयुक्तसमाः युताः कार्याः ततो जन्मवारादि जन्मकालिकवारेष्टघटीपलैर्युताः कार्याः तदनंतरं ऊर्ध्वाङ्कैः सप्ततिष्टसप्तभिर्भक्ते
यत्तोषंतत्। अत्रास्मिन्ग्रंथेऽब्दप्रवेशवारादि वारघटीपलपिंडकं निर्दिशेत्। वेदैरत्र वर्तमानो वारो ज्ञेयः। अथतिथिसा
धनमाह शिव-ऋ-ब्धाब्दः स्वरवाङ्कीदुः ७०० लवाद्यः खाग्नि ३०० शोधितः। जन्मतिथ्यन्वितः तत्र तिथावब्दप्रवेशनं। अब्दः गतवर्षगणः
शिव-ऋ-ब्धेः एकादशभिः गुण्यः स्वरवाङ्कीदुलवाद्यः स्वकीयः यः सप्तत्यधिकशतेन भागः तेनाढ्यः युक्तः कार्यः। जन्मतिथ्यन्वितः शुक्लप्र
तिपदिमारभ्य जन्मकालीनवर्तमानतिथिभिरन्वितः युक्तः खाग्नि ३०० शोधितः त्रिंशद्भक्तः तस्मिन्नुतिथ्यात्स्फुटमितितिथौ अब्दप्रवेश
नेवर्षप्रवेशनाभवति। अस्यांतिथौ अब्दप्रवेशोभवतीतिनियमोनास्ति। कदाचित्पूर्वतिथौ अग्रिमतिथौ वाभवति। अत्रवारस्येवतुप्रा
माण्यं। तिथित्रयमध्ये यस्मिन्नुतिथौ पूर्वोनीतवारोभवति। तस्मिन्नेवर्षे प्रवेशोज्ञेयः। यत्र कुत्रापिशोधितः तत्रः एवंशब्दः आयाति
तत्र लब्धस्यत्यागः। शेषस्ययदृणमितिसंज्ञं ज्ञेयं अथोदाहरणकर्मालिख्यते तत्रादौ कस्यचिद्दैवज्ञस्य जन्मसमयोलिख्यते सं
वत १६८० शाके १५४५ माघशुक्लप्रतिपदायां घटी ३६ श्रवणनक्षत्रघटी २४ वज्रयोगघटी ६ अस्मिन्शुभदिनेसूर्योदयाद्गतघटी ११
पलेषु ४ तथारात्रिगतघटी १२ पलं ३१ जन्म अक्षभा ७० देशांतरयोजनानि धनानि २० सूर्यः ९।७।२०।६ जन्मलग्नं ५।२०।५३।५० श्रीः
अथवर्षप्रवेशस्योदाहरणं। तत्र जन्मकालिनः शकः १५५२ वर्तमानशकात् १५५० शोधितः शेषांकप्रमितोजातोगतवर्षगणः २ ३
अथंस्वतुर्थांशेनयुक्तः ८।१५ गतवर्षगणः २६।१५।० गतवर्षगणः २ एकविंशतिभिः गुणितः जातायमंकः ७७ अयनवतिशता
४० भक्तः लब्धंघटीपलात्मकं १९।२५।० एतच्चतुर्थांशयुक्तसमागणः ४६।१५।० घटीषुयुतंजातं ४६।४।२५।० एतज्जन्मवारादि

नु

नाभ्र २०१९ युतंजातोयमंकः ५८११२१८३ ऊर्ध्वांकैसप्ततिशेषंवर्षप्रवेशवारादि २।१२।१८।३० अथतिथ्यानयनं गतवर्ष
गणः २ एकादशभिर्गुणितः ४२ अयंस्वकीयसप्तत्यधिकशतभागेन २ युक्तः ४४ अयंजन्मकालीनशुक्लप्रतिपदिमारभ्यवर्त
मानचैतिथिभिर्युक्तः ४४ त्रिंशतातष्टः शेषप्रमिता १४ जाताःवर्षप्रवेशेकृष्णपक्षेषष्ठी अस्यांतिथौपूर्वोनीतवारोनास्ति। अ
ग्रिमतिथौवर्ततेइतिकारणात्। अस्यां १४ तिथौएकः युक्तः १५ जातेकृष्णपक्षसप्तमीयत्रयस्मिन्मासेजन्मभवतितस्मिन्मा
सेवर्षप्रवेशोभवति। कदाचिज्जन्ममासात्पूर्वमासेऽथवाऽग्रिममासेवर्षभवति तत्रप्रमाणंवक्ष्यतेजन्मकालीनरविणा
सहर्त्मारवियस्मिन्मासेभवतिसएववर्षप्रवेशमासोज्ञेयः। संवत १६८५ शाके १५५० माघकृष्णसप्तमीसोमेघटी ५७ प
लं ३० कृत्तनक्षत्रघटी ७ पलं २८ सकर्मानामयोगघटी ७ पलं २८ अस्मिन्शुभदिनेसूर्योदयाद्गतघटीषु १२।८।३०
वर्षः २८ प्रवेशः अथैतद्वर्षप्रवेशसमयप्रमाणमाह वर्षप्रवेशकालीनोकैः तत्कालेकोजन्मकालरविणास्याद्यतः समः सएव
मासोविज्ञेयोवर्षप्रवेशबुधैर्ध्रुवं। यतः यस्माकारणात्ततकालेवर्षप्रवेशसमयकरणाकरीत्यासाधितः। सूर्यजन्मकालीनर
विणासमस्तत्स्फुटराश्यंशकलाविकलात्मकोभवति। इदमेववर्षप्रवेशसमयप्रमाणं। अस्योदाहरणं। अग्रेप्रदर्श्यते। गणेश
दैवज्ञैः स्वकृततांत्रिकभूषणेजन्मकालीनसूर्येणसहवर्षप्रवेशकालीनोकैः कल्मसुत्सः नायातिइतिज्ञात्वावर्षप्रवे
शसमयभ्रांत्याअन्यसंस्कारोयुक्तः। तद्यथवशकेजन्मशकोनस्तभवतीत्यस्यषंगताब्द -- अधोधः संगुणितः श
रैश्चयुगलनागैरधोधः संगुणितः लब्धंतज्जन्मनोस्यवारघटिकाद्यैर्नाचितंसप्तभिःपूर्वकैर्विहृतंशेषमता

वर्षप्रवेशोध्रुवः १।वर्षप्रवेशाल्लघटीपलाद्यकालकिलेष्टतः संतनं।भानुर्मनुर्भानुसमानएवःसिद्धांतरीत्याप्
रिसाधनीयःजन्मकालनलनीविलासिनीवेवयातिदुलताकलासुतावर्षकालनलिनीपतिस्तयोरंतरंरगतिरुतयुतानि
२ कार्यवर्षध्रुवेतस्माद्सोस्पष्टःप्रजापत्तातत्कालसंभवैःखटैश्चफलनिर्णयः४ अथगणेशदैवज्ञभ्रांतिदूरीकरणार्थंज
न्मकालीनसूर्यसमोवर्षप्रवेशमयकालीनसूर्यस्यविकलात्मकसम्यग्प्रदर्शनार्थंउदाहरणंप्रदश्यते। जन्मसमयेसिद्धांतरहस्या
दृगणः२१२८चक्रं६सूर्योदयेमध्यमोर्कः९।६।१४।३ देशांतरविकलाभिर्युतः९।६।१५इष्टघटीपलाभिः२०।५३चालितःजातःता
लिकोर्कः९।६।४५।२५मंदकेंद्रं५।२२।५४।५५मंदफलंधनं०।४२।२३संस्कृतोर्कः९।७।२७।४८अयनांशाः२४८नरखं
डानि७५।६०।२५वरंधनं२२८संस्कृतोजातोजन्मसमयस्पष्टोर्कः९।७।२०।१६अथवर्षप्रवेशसमयेसिद्धांतस्याहर्गणाः२५२५
चक्रं६सूर्योदयेमध्यमोर्कः९।६।२।५८देशांतरविकलाभिर्युतः९।६।२०इष्टघटीभिःचालितःजातस्तात्कालिकोर्कः९।६।५१।२
मंदकेंद्रं५।२२।५४।२३मंदफलंधनं०।४२।२३संस्कृतोर्कः९।७।३४।५०अयनांशाः२८।२६वरखंडानि७५।६०।२५वरंधनं२२६संस्
कृतोजातोवर्षप्रवेशसमयेस्पष्टोर्कः९।७।२०।१६अयंवर्षकालीनःसूर्यःपूर्वानीतजन्मकालीनसूर्येणसरूपतुल्यो
जातः।इतिएतद्गणेशदैवज्ञमतंनिरस्तअनयारीत्याऽयस्फुट्यतेभवतीतिगणेशदैवज्ञैःनावलोकितइतिज्ञाय
तेतस्माद्वर्षप्रवेशेषष्टघटीभिःपंचांगस्थितसूर्यस्यचालनंदत्वाजन्मकालीनसूर्येणसहकलासुतुल्यतानायति
इतिदत्वावर्षप्रवेशघटीषु अन्यःसंस्कारोयुक्तः।इदमंतरंपततीतिसत्यं।अत्रापिहेतुस्तैर्बुद्धः।अस्माभिःप्रदर्श्यते।

सोब्दात्मआर्यादित्यापक्षाणांपरस्परंअंतरंसति जन्मकालीनसूर्येपंचांगस्थितसूर्ययोः अंतरंपतति।एकपक्षमंगीकृत्य
भयोःसाधनेक्रियतेतदाअंतरंनपतति।नतुसोरपक्षजन्मकालीनसूर्यःसाधितःसौरपक्षात्पंचांगस्थसूर्योपवर्तते॥
तत्रापिअंतरंपततीतिचेद्युज्यतेहेतुः।येनग्रामस्यैकस्यापिजन्मसमयग्रहसाधनेक्रियतेनयाग्रामेजन्मतद्ग्रामस्थवरदेशां
तरसंस्कारःक्रियतेयेनयद्ग्रामस्थयत्पंचांगेक्रियतेतेनतद्ग्रामस्थवरदेशांतरसंस्कारोयद्यपिक्रियतेग्रामेग्रामेवरदेशांतरं
भिन्नंइतिकारणात्अंतरंपततिउभयोरेकदास्थसंस्कारश्चक्रियते।तदांतरंसर्वथैवनपतति।यस्माद्यथाला
धितःसूर्यःकलात्मकस्तथाभवतीतिनिश्चितं।अत्रार्थपूर्वमेवोदाहरणंप्रदर्शितं।अनयारीत्याऽयस्फुट्य
तेभवतीतिज्ञात्वादैवज्ञवक्त्रतुंडाभिधानैःश्रीकेशवदैवज्ञैरन्यथाचार्यैर्नान्यसंस्कारोवर्षप्रवेशसमयेयुक्तः।
गणेशदैवज्ञैर्यदुक्तंतदसत्त्॥ अथवर्षप्रवेशसमयेस्पष्टाःग्रहाःसाध्याः। तत्रापिस्फुटार्थंपंचांगस्थितसूर्यं
पुनश्चालनमाह॥ ॥गते घ्यादिवसाद्यगतिर्निघ्नीस्वषट्हृता।लब्धमंशादिकंशोध्यंयोज्यंस्पष्टाभवद्भुजादितः।
२ गते घ्यादिवसैःकृत्वाग्रहस्यकलादिकागतिर्गुणास्वषट्भिःषष्ट्याभाजितःलब्धमंशादिकंअंशकलाविक
लात्मकंपंचांगस्थितग्रहेशोध्यंयोज्यंवा।यदागतिमतरंतदाशोध्यं।यदात्वल्पमतरंस्यात्तदायोज्यंसतात्कालि
कःस्पष्टोग्रहोभवेत्।वक्रगतिग्रहस्यराहुकेतोश्चचालनंमार्गग्रहापेक्षयाविपरीतंज्ञेयं॥उदाहरणं।वर्षप्रवेशवा
रादिकमध्ये २।१२।९८ अवधिस्थवारादिनाधा १।१६।३८शोधितेजातेश्चालकांकः २।२८।१२ अनेनसर्वेग्रहाश्चालि

ताः अथ पेषांगस्थनक्षत्रात्वंद्वानयनमाह खषट्कघ्नेभयातहृति। व्याख्या वर्षप्रवेशसमये यन्नक्षत्रं तस्य नक्षत्रस्येष्टकालावधिभुक्तघटिकाः कार्याः। ताः षष्ट्यागुण्याः। भभोगाप्ता नक्षत्रस्यगतेष्ययोगेन भाज्याल्लब्धं तत्षष्टिगुणिताश्विन्यादिगतनक्षत्रयुक्ता। द्विनिघ्नाः। ताः अश्विन्यादिनक्षत्रविष्टघटीपर्यंतगतघटिकाः भवंति तानवभिर्भाज्याल्लब्धमंशाः। शेषं षष्ट्यागुण्यं नवभिर्भाज्यं लब्धं कलाः। पुनः शेषं षष्ट्यागुण्यं नवभिर्भाज्यं लब्धं विकलाः। एवं शशीभागपूर्वांशादिकस्तात्कालिकः स्यात्। अथ गतिसाधनं खखाभ्राक्षवेदभभोगेन ४८०० नक्षत्रगतेष्ययोगेन भक्ताः। वंद्वकलादिकास्पष्टागतिः स्यात् उदाहरणं वर्षप्रवेशसमये रुग्नक्षत्रं तस्य पूर्वदिनेभुक्तघटिकाः ४१ पलं २४ एताः इष्टघटीभिः १२ पलानि ८ युक्ताः। इष्टघटीपर्यंतं रुग्नक्षत्रस्य भुक्तघटिकाः जाताः ५३ पल ४२ एताः षष्ट्यागुणिताः ३२२२ नक्षत्रस्यगतेष्ययोगेन ५८।५२ भक्ताः। सवर्णितौभास्कर्ज्य १९३२२० भाजकोऽ ५३२ भजनाल्लब्धं ५४।४१ अश्विन्यादिगतनक्षत्रपर्यंतसंख्या १२ षष्ट्यागुणिताः ७२० पूर्वलब्धा ५४।४१ युक्ताः। ७७४।१ द्विगुणिताः १५४८।२ नवभिर्भक्ता लब्धमंशादिकं १७२।९।४७ अश्वशिखिशतांभक्ता जाताताल्कालिकोराश्यादिर्वंद्वः ५।२२।९।४७ अयनंखखाभ्राक्षवेदनक्षत्रस्यगतेष्ययोगेन ५८।५२ भक्ता लब्धाकलादिकाः वंद्वस्यगतिः ८५।२४ उक्तरीत्यासाधिताः स्पष्टाग्रहाः अथ भावसाधनमाह तत्रलग्नसाधनमिष्टकालाधिनं। दशमलग्नसाधनं नतोन्नताधिनं। तत्राद्यं नतोन्नतसाधनमाह पूर्वेनतंस्याद्दिनरात्रिखंडं दिवानिशोरिष्टघटीविहीनं। दिवानिशोरिष्टघटीषु शुद्धं रात्रिखंडं तु परं नतं स्यात्। दिनखंडं दिनार्द्धं दिनगतघटीभिर्हीनं कार्यं दिवसे पूर्वेनतं स्यात्। एवं रात्रिखंडं रात्र्यर्द्धगतघटीभिर्हीनं कार्यं रात्रौ पूर्वेनतं स्यात्॥ एतल्लक्षणेऽनर्द्धगते रात्र्यर्द्धात्पूर्वं इष्टकाले सति यदि नार्धादुपरि इष्टकालस्तदा सूर्यास्तादिष्टघटीषु शुद्धं शोध्यं खंडं दिनार्द्धं वसेऽपरपश्चिमनतं स्यात् तथा रात्र्यर्धादुपरि इष्टकाले सति सूर्यास्तादिष्टघटीषु शोध्यं रात्र्यर्धं रात्रौ पश्चिमनतं स्यात् अथ सप्तभिः श्लोकैः भावसाधितानयनमाह तात्कालिकसायनार्कस्य भुक्तभोग्यांशासंगुणात्। स्वोदयात्खाग्निभः ३० लब्धं यद्भुक्तभोग्ययोर्ज्ञेयं तत् इष्टनाडीपलैर्भुक्तभोग्यपर्यंतव्याख्यानं तात्कालिकोर्कः अयनांशैर्युक्तः कार्यः। तस्य भुक्तभोग्यसंगुण्यादिति। यदा ऋणलग्नसाधनं क्रियते तदा भुक्तांशाग्राह्याः। यदा धनाख्यं लग्नं क्रियते तदा भोग्यांशाग्राह्याः। तैः स्वोदयो गुणनीयः। त्रिंशद्भक्तः। रवेर्भुक्तं अथवा भोग्यं यत्तल्लब्धं तद्दिष्टघटीपलेभ्यः शोध्यं ज्ञेयं तच्छोध्यं यत्। तदनंतरं राशेर्गतगम्यनिजोदयांस्त्यजेत्। तद्यथा यदा भुक्तकालः साध्यते तदा गुणितोदयात् पलोदयाः शोध्याः। यदा भोग्यकालः साध्यते तदा गुणितोदयात् अग्रिमोदयाः शोध्याः। शुद्धे यल्लब्धं तत्स्वाग्र्या ३० रुतं। अशुद्धे नयः शोधितो नभुध्यति सः। अशुद्धोदयस्तेन भक्तं फलं अग्रादिकं याह्यं। तदशुद्धभेदहीनकार्यं। शुद्धे सकार्यं तद्यथा ऋणलग्नसाधने मेषाद्गणनया यद्राशिसंख्यकः शुद्धोदयो भवति। तद्राशिसंख्यामध्ये लग्नलवादिकं

	वं॰	मं॰	बु॰	बृ॰	शु॰	श॰	रा॰	के॰
	५	८	८	८	७	६	२	८
	२२	२२	२२	२२	२२	२२	२२	२२
	८	२२	२२	२२	८	२२	२२	२२
	४७	४६	८	२२	४८	४५	४६	४६
	६	८	८	८	७	६	२	८
	८	८	२२	२२	८	२२	२२	२२
	२४	२२	२२	२२	२४	२२	२२	२२

श्री॰ ५

दीनंकार्यं। धनलग्नसाधनेमेषादुपानयायद्राशिसंख्याकाशुद्धास्तदादयोभवंति। तद्राशिसंख्यामध्येलवादिकंयोज्यं। तदनंतरं व्ययनाशकंअयनांशकेरहितंकार्यं। तनुर्लग्नंस्यात्। एवमनयारीत्यालंकोदयैःकृत्वारवेर्भुक्तंभोग्यंसाध्यं। तत्सलीकृताद्पूर्वपश्चिमनतस्फोट्यं। अन्यदवशिष्टंयत्कर्मतत्सावयवपूर्वरीत्यासाध्यं। तद्दशमंभवेत्। तद्यथा यदापूर्वनतंभवति तदापूर्वनतमिष्टकालेप्रकल्प्यलंकोदयैःकृत्वारवेर्भुक्तंसाध्यं। अन्याक्रियाकरणलग्नवत्। यदापश्चिमनतंभवति। तदापश्चिमनतंमिष्टकालंप्रकल्प्यलंकोदयैःकृत्वारवेर्भोग्यंसाध्यं। अन्याक्रियाधनवत्कार्यं। तद्दशमंभवेत्। अथलग्नदशमयोर्नवांशसाधनमाह षष्ठिहृतेति। लग्नर्क्षशिष्टंयुतंजायासप्तमभावोभवति। स्वंदशमंषष्ठतुर्यश्चतुर्थभावोभवति। एवंभाववत्तृतीयंज्ञेयं। अथलग्नानतुर्यतः लग्नंचतुर्थभावात्स्फोट्यं। शेषस्यषष्ट्यांशोराश्यादिस्तेनयुक्तेनतुल्यंकार्यं सतृतीयभावयोः संधिस्यात्। लग्नस्यदिशमसंधिः स्यात्। धनभावस्यापिसंधिरितिसर्वत्रज्ञेयं। अथैषष्ठांशयोजनादितिसएवंआगताः संधिस्तेनषष्ठांशेनयुक्तोऽग्रेद्वितीयभावःस्यात्। द्वितीयभावषष्ठांशयुक्तःद्वितीयतृतीयभावसंधिःस्यात्। अथैषष्ठांशयुक्तःतृतीयभावःस्यात्। अथंषष्ठांशयुक्तःतृतीयचतुर्थभावयोःसंधिःस्यात्। एवंत्रयःससंधयोभावाःजाताः। तदनंतरंअथैत्रयःससंधयःभावाःसाध्याः। तद्यथा पूर्वानीतषष्ठांशरूपमध्येसंशोध्यअनेनराश्यादिनास्वभावोयुक्तश्चतुर्थपंचमभावयोःसंधिःस्यात्। अथमेकसंधिः। पुनस्तेनयुक्तःपंचमभावःस्यात्। अथैतेनयुक्तःपंचमषष्ठभावयोःसंधिःस्यात्। अथैतेनयुक्तःषष्ठभावोभवति। अथैतेनयुक्तःषष्ठसप्तमभावयोःसंधिःस्यात्। एवंषट्ससंधयोभावाःजाताः। एतेसार्धयुक्ताः। सार्धषट्राश्यःतेनयुक्ताःसंतःअवशिष्टाषट्भावाःससंधयःस्युः। एवंभावसंधिनिष्पत्तिःप्रयोजनमाह खेटाप्तेति। योग्यद्योयद्भावस्थोभवति। सस्वेष्टभावस्यराश्यंशकलाविकलाभिःतुल्यःस्यात्। तदासयद्भःतद्भावस्थशुभमशुभंवाफलंपूर्णांविंशतिविभक्तमंदगतिसंधितुल्यंयद्भोन्यंफलंभवति। अथसूर्यस्यभुक्तमथवाभाग्यउक्तरीत्यानीतंतदीष्टघटीपलाभ्यांनशुध्यत्तदाकेनोपायेनलग्नसाधनमित्यतआह भुक्तमिति। भुक्तंभोग्यंयदेष्टकालनाडीपलाभ्यांनशुध्येत्। तदाइष्टनाडीपलानित्रिंशद्गुणितानिकार्याणि। सायनसूर्यस्यराश्युदयेनभाज्यानि। फलंलवाद्यंग्राह्यंहीनयुक्तंसारकेकार्यं। तद्यथा यदारवेर्भुक्तमानीतंभवति। तदालवाद्यंफलंसूर्यमध्येहीनंकार्यं। यदाभोग्यमानीतंभवति। तदालवाद्यंफलंसूर्यमध्येयुक्तंकार्यं। तत्तनुर्लग्नस्यात्। रात्रौलग्नसाधनंवक्ष्यतेतदाराशिषट्कयुक्तार्कवेःसकाशात्तल्लग्नंशोध्यं। रात्रौदशमलग्नसाधनेपिराशिषट्कयुक्तार्कवेःसकाशात्भुक्तभोग्यंशोध्यं। अत्रोदाहरणं। अस्यजन्मभूमौउदयः। नाक्षत्रिकोर्कः २।७।३०।६ अयनांशयुक्तः ९।२५।५८।६ अस्यभोस्यांशैः ४।७।५४ मकरराशेरुदयाः २८ गुणितः १२।१७।२।२।१२ अयंत्रिंशद्भक्तः जातोभोग्यकालः ४०।२२।५४ अयंदृष्टनाडी १२।५८।३० पलाभ्यः ७२।३०।शोधितःशेषं ४५८।३।१६ मकरादयेकुंभोदयः २९ शेषाच्छोधितशेषं ४५८।३।१६ मीनादयेमेषोदयः २९ अयंशेषात् ४५८।३।१६ नशुध्यति। अतःशेषं ४५८।३।१६ स्वस्यार्कतुल्यं ४५८।३८।० अशुद्धोदयेन ॥ ६ भक्तंलब्धमशुद्धादिकं।।

नयुक्तं १।६।२६।१६ इष्टत्रयनांशैः १८।२६ हीनं जातं लग्नं ०।१८।१०।१६ राशिषड्युतं जायास्तवनं ६।१८।१०।१६ अ
थदशमलग्नस्योदाहरणं॥ तत्रलंकोदयाः दिनार्धम् १२।४४ दिनगतघटीभिः १२।१८।३० हीनं जातपूर्वनतं ०।२५
।३० अयंइष्टकालः लंकोदयैः कृत्वासायनाशभुक्तभागाः गुणनीयाः उपरितनांकैः विभक्ताः लब्धं भुक्तकालः जातोभुक्तका
लः २६।२८।० अयंइष्टघटीपलेभ्यः २५।३० नशुद्ध्यति अतः शेषं २५।३० त्रिंशत्कृतिं ७६ स्वोदयेन ३२ भक्तं फलं ल
वादिकं २।२२।६ इदं राश्यादिसूर्यमध्ये ८।७।३०।६ हीनं जातं दशमलग्नं ८।५।८।० इदं राशिषड्युतं ज्ञातसुखभवनं ३।
५।८।० लग्नहीनचतुर्थभावस्यशेषं २१।६।५२ इदं षड्भक्तं लब्धं राश्यादि ०।२१।८।३० अनेनयुतं लग्नजातोलग्नस्याद्धिराम
संधिः ७।०।५१।३० अयंषष्ठांशेनयुतोजातोद्वितीयभावः १।२३।८।३० अयंषष्ठांशेनयुतोजातोद्वितीयभावस्यसंधिः १।२६।८।७
अयंषष्ठांशेनयुतोजातःस्तृतीयःभावः २।८।२६।३८ अयंषष्ठांशेनयुतोजातःतृतीयसावस्यसंधिः २।२२।७।२९ प्रागा
नीतषष्ठांशः १।२४।३० अयंरूपातशोधितेः शेषं ०।२७।१०।२२ अनेनसुखसावोयुक्तः जातःसुखसावस्यसंधिः ४
३।१८।२३ अयंतेनयुक्तः जातःपंचमभावः ४।१२।८।४६ अयंतेनयुक्तःजातःपंचमभावस्यसंधिः ४।२६।१९ अयंतेनयु
क्तः जातःषष्ठमभावः ५।२३।४९।२ अयंतेनयुक्तःजातःषष्ठमभावस्यसंधिः ६।०।४९।५९ एतेराशिषड्युक्ताःअवशि
ष्टासंध्ययोभावाः जातासर्वेएकत्रलिख्यंते अथभावस्यग्रहफलं खेटसंधिद्वयंतस्फुटफलंतज्जावज्जंभवेत्॥ ही
नधिकेद्वसंधिभ्योभावपूर्वापरेफलं॥ खेटसंधिद्वयांतस्फुटइति तद्यथा ग्रहआसन्नसंधेःसकाशात्॥ अधिके

सतिविरामसंधेःसकाशात्न्यूनेसतितदाग्रहोयस्मिन्भावेवर्त्ततेतज्जावजंफलंभवेत् सर्वादिदिग्नांशकाः द्वसं
धिभ्यांहीनेऽधिकाग्रहेसतिपूर्वापरभावेफलंभवेत्तद्यथा आरंभसंधेःसकाशात् ग्रहेहीनेसतियज्जावेवर्त्तते
तज्जातपूर्वभावस्थफलंददाति विरामसंधेःसकाशात् ग्रहेऽधिकोभवतितदाऽग्रिमभावस्थफलंददाति॥
लग्नकुंडलीभावकुंडलीलिख्यंते अथग्रहाणांविशोपकात्मकभावफलमाह ग्रहसंध्यंतरंकार्यंविंशत्याग
णितंभजेत्भावसंध्यंतरेणाप्तंफलंविंशोपकास्मृताः ॥ उदाहरणमेवव्याख्या सूर्यः ९।२७।०।६ अस्यसं
धिः ९।२२।८।२३ अनयोरंतरं ०।४।८।७ विंशत्यागुणितं २६।४०।० भावः ९।२७।० संधिः ९।२३।८।२३ अन

| | | |

नयेरंतेरषा-२।१०।२३ भजेत अथसवर्णितेभाज्यः१०।४९।४० भाजकः४९८२३ भाजकेनहृतेभाज्येयदाप्तंफलंतदेवविशेषकल्पितः
२।१२ एवंखंडदीनांविशेषकात्मकनिर्भावफलानिलिख्यंते अथयद्राशेफलंवक्ष्यति तद्यथा यदूनखलमधिकारा विनानभवति
ते-अधिकाराःपंच यथा मेषकाद्दृत्खेचं रुद्दृवेराशिकंगुसल्लुद्दन्वेति।अधिकारविनायदूनबलीतत्रादेराशिखंडक्षणे
शानादु मेषस्यभौमः।वृषस्यशुक्रः।मिथुनस्यबुधः।कर्कस्यचंद्रः।सिंहस्यरविः।कन्यायाःबुधः।तुलायाःशुक्रः।वृश्चिकस्यभौमः।
धनुषःगुरुः।मकरस्यशनिः।कुंभस्यशनिः।मीनस्यगुरुः।एतेराशीश्वराः अथखंडक्षणस्वामीनरुच्यते।आद्याइति राशेस्तृतीयांशाद
शांशात्मकाखंडक्षणाउच्यते।एकस्मिन्राशौत्रयोखंडक्षणाः।अतःकस्मिन्नराशौकियत्संख्याकाखंडक्षणास्तिविचार्यग्रथमश्चेत्तर्हिभौमात्
द्वितीयश्चेद्वेःतृतीयश्चेच्छुक्रात्तन्नयारित्याक्रियते।मेषादिद्वादशराशिषुखंडक्षणपाःक्षणास्वामिनाम वृ मि क सिं कं तु द्ध म कुं मी राशयः
भवंति इतिखंडक्षणचक्रं॥ अथयद्राशेउच्चराशिशुद्धांशादु सूर्यादीनांयद्दाशांतुंगसंज्ञराशयःसुभं बु दृ शु श र चं मं बु दृ शु श र चं मं बु दृ शु श
र चं मं बु दृ शु श ॥सूर्यस्यअजःमेषउच्चांदभिर्दशभिरंशैः।चंद्रस्यउक्षःवृषःउच्चगुणे र चं मं बु दृ शु श र चं मं बु दृ
२ ० २८ २५ ५ ३२ स्तभिरंशैः॥ भौमस्यनक्रःमकरऊच्चांशैरष्टाविंशतिभि शु श र चं मं बु दृ शु श र चं मं-
मे दृ मि क सिं कं तु दृ रंशैः।बुधस्यकन्याउच्चांशैरंकैःपंचदशाभिरंशैः।गुरुःकुलीरःकर्कोरुच्चभूतेःपंचभिरंशैः।शुक्र श्री.
तु दृ क मी म क मे स्यांशैर्मीनस्वभसंख्यसप्तविंशतिभिरंशैः।शनेस्तुलाउच्चंनवसंमितविंशतिभिरंशैःपरमोच्चमि ८
ति॥ ॥अथयद्राशेर्नीचस्थानंउच्चबलानयनंनवांशस्वामिनश्चादाउत्तमसप्तमनीचमनेनदृष्टाधिकश्चेद्दस्वमाद्दृशोधः
चक्रात्तदाशकलवोबलंस्यात्।क्रियतेतोदृग्भतानवांशाः२० तेषांस्वोच्चराशेनांसप्तमस्तत्कालंराशेर्नीचांशा

स्तएव यथासूर्यतुलानीचंदशभिरंशैःपरमं।एवंखंडदीनांज्ञेयं।नीचानि। अनेननीचग्रहादीनश्चेद्दसप्तमाधिकः।तदास्वक्षाद्दशराशी
न्यःशोध्यःशेषस्यांशाःकार्याःनवभिर्भाज्यःलब्धंकलादिउच्चबलंस्यात्। अथनवांशेशानाह्यंते॥ अस्मादिति।राशेस्तृतीयांशाद
शांशात्मकाक्रियामेषःवृषोमकरःतोलिःतुला।इंद्रुसंकर्कः।एतेमेषादिराशिनांधिराढ्यारोधाःभवंतिते।यथा मेषसिंध
नराशीनांआद्योमेषः।वृषकन्यामकरःमिथुनतुलाकुंभराशीनांआद्यःतुला।ककेवृश्चिकमीनराशीनांआद्यःकर्कः।इतिनवांश
कमज्ञेयः। अथषड्भिर्कःमेषादिद्वादशराशिषुद्दृशानाह अंकस्थापनमेवव्याख्या।मेषराशेप्रथमषडंशानांजीवोगु
रुः।ततःषडंशानांआस्फुजिच्छुक्रः।ततोऽष्टानांअंशानांज्ञोबुधः।पंचांशानांआदोभौमः।मे दृ मि क सिं कं तु दृ ध म कुं मी
मे म तु क ततःपंचानांअंशेश्वराःस्वामी।एवमेवदृषादिद्दृष्टांकं॥ अथपंचवर्ग शु दृ शु बु मं बृ बु शु मं बृ बु शु मं बृ बु शु
मे दृ मि क वक्ष्यमाह॥ ॥त्रिंशत्सभक्तेत्र स्वेस्वराशौग्रहेत्रिंशद्भक्तेवाःबलंस्वेस्व बु शु शु शु शु बु शु शु शु शु बु शु
सिं कं तु दृ वस्त्रिंशांशतिर्बलं स्वद्दाक्षेपंचदशभक्तेबलं।स्वद्दक्षाणस्खंदृ बु शु शु बृ शु बृ शु बु शु शु बु
ध म कुं मी शबलं१० मुशद्धेस्वनवांशस्त्रेपंचदशभक्ताः।उक्ताः।वेदलवैः।बलस्य मं शु मं बृ शु मं शु बु मं मं मं मं मं
नवांशकाक्रम चतुर्थांशाविशोपकाःप्रकल्प्याः। यदाग्रहःस्वाग्रस्वद्दाग्वद्दक्षा
णास्वनवांशषुपंचस्वधिकारेषुकुत्रापिनामाद्दास्वस्वाधिकारे। स्वस्वाधिकारिकबृ शु मं बृ शु शु मं बृ शु शु शु शु बृ
लस्यविमागःसद्दृदानंचतुर्थांशेनबलंग्राह्यं।समभेसमग्रहेअद्धाअर्दभेशबुगर्दृघ्रिश्चतुर्थांशोबलंस्यात्।।तद्यथा ग्रहस्यस्वग्र
हेत्रिंशद्भागावाःबलंस्यात्।मित्रग्रहेपादोनंसार्द्धविंशतिः२२।३० समभेअर्द्धपंचदशजाताः।शत्रुग्रहेचतुर्थांशाः साद्धाःसप्त७।३०

तथास्वद्रुद्दायांपंचदशा०।५मित्रद्रुद्दायांस्वपादाः एकादशा११।१५समद्रुद्दायोसार्द्धैः सप्त ७।३०शत्रुद्रुद्दायांपादोनाश्चत्वा
रः३।४५तथास्वद्रुष्काणदशा१०मित्रद्रुष्काणेसार्द्धैः सप्त ७।३०समद्रुष्काणेपंच५शत्रुद्रुष्काणे सार्धद्वयं।एवंस्वनवांशेपंच५
मित्रनवांशेपादोनाश्चत्वारः३।४५समनवांशेसार्द्धद्वयं २।३० शत्रुनवांशेसपादमेक १।१५ बलंस्यात्। एवंपंचवर्गे
बलंसमानीयतश्चेष्टबलंचानायोगेवेदोद्दिष्टेचतुर्भिर्हृते यल्लब्धंतद्दिनोपकासंख्यहणाबलंभवति।शरोनः पं
चभ्योन्यूनःहीनबलोयहास्तेयः।उक्तंच।पंचात्योहीनवीर्यस्यात्। अधिकोमध्योच्यते। दशाधिकोबलीप्रोक्तः।पं
चवर्गेबलादिदं। अथक्रमप्राप्तमुदाहरणंप्रदर्शनार्थंवक्ष्यमाणमिचसमत्राचार्योलिख्यते॥उदाहरणंसूर्यः॥
।९।७।२०।६।अस्यमकरशोस्थितस्यागदेशाशनिः अयंसूर्यशत्रुः।अतःकारणाद्गृहेप्राप्तंबलंसार्द्धसप्त
।७।३०। अथोच्चबलंसूर्यस्यनीचंदृ।१०।अनेनहीनोरविः।२।३०।२०।६।अस्यांशाः।८७।३०।६।नवभिर्भक्तांश
तंसूर्योच्चबलं।९।४३। अथद्रेशबलं।मकरराशोसूर्यस्यसप्तअंशाःत्रिंशत्कलाःधियंते।मकरराशोयत्पादा
सप्तांशाः अयंसप्ताधिकोयमसप्तमध्येवर्ततेइतिकारणात्तोद्रेशायुरुः।अयंसूर्यस्यसमोभवति॥समद्रुद्दायं॥
।७।३। प्राप्तंबलंमकरराशोप्रथमद्रेशकमध्येवर्ततेतद्दीशायुरुः।अयंसमत्वात्प्राप्तंत्रैराशिकबलं।५।०।मुसलद्रुहबलं।
नवांशागम्यनयात्तोमुसलद्रुहेशायुरुः।२अस्यसमत्वात्प्राप्तं २।३०।पंचानांयोगः।३२।७२। चंद्रादीनांक्षेयं।द्वाद
शबलं।८।३।एवंक्षेत्रीभूतं।३२।क्षेत्रंग्रह।होरात्रिवर्गश्चक्रबलमोह।होरात्रिलवः चतुर्लवः।पंचलवः।षड्लवः।स

	स्व	मि	स	श	या·
य	घा	स्व	मि	स	शत्रु
मि	३०	२२	५	७	गृहं
त्रे	०	३०	०	०	द्रुद्दा
स	१५	२२	७	७	द्रेरा
म	०	३५	०	३५	शिक
श	२	७	५	२	
त्रु	०	०	०	०	
नवां	५	३	२	१५	
शाः	०	३०	०	१५	

लग्नसमयेविद्यमानग्रहाणांसुधीभिर्विज्ञातव्याः।शुभानांशुभग्रहाणांसुधीभिर्विज्ञातव्याः॥शुभा
नांशुभग्रहाणांवर्गाश्चेष्टाः।शुभफलदास्तेयाः।पापग्रहाणांवर्गाश्चेत्स्युस्तदाऽनिष्टाः।दुष्टफल
दास्तेयाः॥अथहोराद्रेष्काणचतुर्थांशानामधीशानाह।ओजेरविंदोः समरंध्रव्याहोरंगृहा
द्रेप्रमितेविचिंत्ये।द्रेष्काणचाः।स्वस्वनवर्क्षनाथास्तुर्यांशयाः। स्वयंयकेंद्रनाथाः।४०।ओजेतावि
षमराशौगृहार्द्धंपंचदशभागः।तत्रप्रमितेरविंदोर्होरांविचिंत्येतेयं।तद्यथा।प्रथमंत्रिंशद्भा
गमध्येसूर्यस्यतदनंतरंचंद्रस्यतथासराशेश्चद्रव्योविचिंत्ये।अथद्रेष्काणाउच्यंते॥राशे
स्त्रिभागोद्रेष्काणोत्रापरिमितेद्रेष्काणेक्षेयः।यस्यद्रेष्काणविचारःक्रियतेसचेत्स्वर्थंभागमध्येतदायस्मिन्नरा
शौनिष्ठितंतद्राशिस्वामिनएवद्रेष्काणाधीशत्वं।तदीयद्रेष्काणाश्चत्रिंशद्राशेः सकाशान्नवभागाराशिस्तस्या
मिनएवद्रेष्काणाधीशत्वं॥अथतुर्यांशस्वामिनोच्यते।स्वर्क्षंस्वकेंद्रनाथाइति।स्वर्क्षंयदाधिष्ठितोयोराशिः।तस्मा
ज्ज्ञातानिकेंद्राणितन्नाथाएवतुर्यांशस्वामिनः।तद्यथा।राशेस्त्रिंशद्भागास्तस्यचतुर्थांशाः सार्द्धसप्त ७।३०।तत्र
प्रथमविभागमध्ये७।३० स्वर्क्षस्वराशिस्वामिनएवाधिपत्यं।तृतीयभाग २२।३०।स्वराशेः सकाशात्सप्तमोसका
शाच्चतुर्थोयोराशिः तस्यस्वामिनएवाधिपत्यं।द्वितीयभाग १५।०।मध्येकेंद्रनाथः सकाशात्सप्तमोयोराशिस्तस्या
मिनएवाधिपत्यं।चतुर्थभाग ३० मध्येस्वराशेः सकाशाद्दशमोयोराशिः तस्यस्वामिनए

वधिपत्यं अथपंचमांशेशद्वादशांशेशानाह ॥ओजर्क्षेपंचमांशेशाकुजाकिज्यज्ञासूर्याः समभेज्यसमाज्ञेयद्वादशांशाः स्वभात्स्मृताः ॥४०॥पंचमांशप्रमाणंषडंशगुणएवराशौपंचभवति तत्राजर्क्षेविषमराशौ प्रथमपंचमांशेस्वामीकुजः द्वितीयपंचमांशस्वामीअर्कः शनिः तृतीयपंचमांशस्वामीईज्यः गुरुः चतुर्थपंचमांशस्वामीज्ञोबुधः पंचमपंचमांशस्वामीभार्गवः शुक्रः समभेसमराशौव्यत्ययविपरीताज्ञेयाः तद्यथा समराशौप्रथमपंचमांशस्वामीशुक्रः एवंक्रमेणाविपरीतश्शुक्रबुधगुरुःशनिकुजःज्ञेयं ॥ अथद्वादशांशास्वामिनोऽर्क्ष

	१	२	३	४	५	६	७	८	९	१०	११	१२
गुरुः	३०	०	३०	०	३०	०	३०	०	३०	०	३०	०
रविः	३०	०	३०	०	३०	०	३०	०	३०	०	३०	०
बुधः	३०	०	३०	०	३०	०	३०	०	३०	०	३०	०
शुक्रः	३०	०	३०	०	३०	०	३०	०	३०	०	३०	०
बुधः	३०	०	३०	०	३०	०	३०	०	३०	०	३०	०
गुरुः	३०	०	३०	०	३०	०	३०	०	३०	०	३०	०
भौमः	३०	०	३०	०	३०	०	३०	०	३०	०	३०	०
शनिः	३०	०	३०	०	३०	०	३०	०	३०	०	३०	०

स्तेद्वादशांशाःस्वास्वराशेःसकाशात्मृताःयथाद्वादशप्रमाणंसार्धमंशाद्वयं २।३०एवंराशौद्वादशभवंतितेयथा एतत्प्रमाणान २।३० यत्संख्यमंशेयुरसिद्धयतिस्वराशितःतत्संख्यराशेर्द्वादशांशेशाज्ञेयः अथषट्सप्ताष्टनवदशैकादशांशेशानयनमाह लवीकृतोद्यामत्वरांशाःरेखात्रयंकदियुङ्नवघ्नाः—स्वरागतास्तेकनगास्तनंदिरुद्रसागकुयुतास्त्रियाप्ताः स्युरिति व्याख्या ४२ द्यामत्वरांशात्मकःकार्यःषट्स्थानेस्थाप्यः क्रमेणारसद्व्यंगद्वीशेत्वसप्तअंशुयुताःएवंग्रह

शेषंधमेषाद्गणनयाजातःकन्याराशिःतत्स्वामीबुधः। एवंजातेरेकादशस्वामीबुधः। अथद्वादशांशः। एवंद्वादशांश
गणनयास्वतुर्थेविभागमध्येवर्तते। अतःमकराद्गणनयाजातोचतुर्थीमेषराशिःतत्स्वामीभौमः। एवंजातोद्वादशांशे
स्वामीभौमः॥ एवंवंद्वादीनामपिज्ञेयं॥ग्रहाणांद्वादशवर्गचक्रं॥ अथद्वादशवर्गफलमाह॥ एवंद्वादशवर्गःस्याद्
ग्रहाणांबलसिद्धये॥ स्वाद्यमित्रशुभाश्चेष्टानीचारिक्रूरतोशुभाः४७ एवंग्रहाणांबलसिद्धयेद्वादशवर्गःस्यात्। द्वादशवर्गः
स्वाद्यमित्रशुभाश्चेष्टा। तद्यथा। यस्यग्रहस्यद्वादशवर्गःक्रियतेसस्वत्सग्रहादिषुअथवास्वाद्यवर्गोअथवामित्रवर्गोअ
थवाशुभग्रहस्यवर्गोभवति। तदाश्चेष्टाशुभफलदात्री। सग्रहःयदिस्ववर्गेअथवाशुवर्गेअथवापापग्रहस्यवर्गेस्थितिष
ति। तदाअशुभदुष्टफलदात्री॥ अथद्वादशवर्ग्यंशुभपापवर्गपङ्क्तिद्वयंवीक्ष्यशुभाधिकत्वेदशाफलंवाच्यं। शुभस्यनिष्ट
त्वशुभाधिकत्व॥४८॥ एवंग्रहाणांद्वादशवर्गःकार्यः। तत्रलग्नादिद्वादशस्थानेषुकंयंकियंतःशुभग्रहवर्गाःकियंतःपापवर्गाः
स्थितिविचार्यशुभग्रहसंख्याभिन्नालेख्या। पापग्रहसंख्याभिन्नालेख्यापंक्तिद्वयस्यांतरंकार्यं। यदिशुभाधिकत्वंशुभ
ग्रहस्यशेषमवशिष्टंतदातद्ग्रहस्यदशाफलंसावफलंशुभं। शुभाधिकमेववाच्यं। यदिपापग्रहाधिकत्वंपापग्रहस्य
शेषंअवशिष्टंतदातद्ग्रहस्यदशाफलंसावफलंचअनिष्टमेववाच्यं। अथग्रहभेदेनसौम्यपापवर्गभेदेनत्वफलता
रतम्यमाह॥ क्रूरोपिसौम्याधिकवर्गशाली शुभंतिसौम्यःशुभखेचरश्चेत्॥ सौम्योपिपापाधिकवर्गयोगेनेष्टंतिनिद्यःखलु
पापखेटः॥४९॥ व्याख्या। यस्यग्रहस्यपापवर्गेकाक्रियतेसस्वक्रूरोपिपापग्रहोपिभवति। द्वादशवर्ग्यांसौम्यग्रहाधिकवर्गेण

र	चं	मं	बु	गु	शु	श	ग्रहाः
श	बु	इ	इ	चं	मं	शु	गृहं
चं	सू	र	र	चं	र	बु	होरा
श	शु	बु	मं	र	शु	चं	द्रेक्का.
मं	बु	इ	इ	बु	र	शु	चतुर्थां
बु	श	इ	इ	शु	मं	चं	पंचमां
मं	श	बु	शु	बु	श	शु	षष्ठांश
चं	र	इ	श	बु	चं	मं	सप्तांश
बु	श	चं	मं	चं	बु	शु	अष्टमां
इ	चं	र	चं	चं	श	इ	नवांश
इ	श	चं	मं	बु	चं	बु	दशमां
बु	चं	श	इ	बु	चं	इ	एकाद.
मं	शु	शु	मं	मं	र	इ	द्वादशां

शालतेयुक्तेसतिवर्तते। तदाशुभःशुभफलदाशुभखेचरश्चेत्। तद्यथा। यस्यद्वादशवर्गेकाक्रियते। शु
यदिशुभग्रहभवतिर्यादशुभग्रहद्वादशवर्ग्यंशुभाधिकवर्गंप्राप्नोति। तदाअतिसौम्यः। अत्यंतशु
भफलदाः। सौम्योपिपापाधिकवर्गानेष्टः। तद्यथा। यस्यग्रहस्यद्वादशवर्गेकाक्रियतेसयदिशुभग्रहो
भवतिद्वादशवर्ग्यांपापग्रहाधिकवर्गंप्राप्तोभवतितदानेष्टःअशुभफलदः। पापखेटः। तद्यथा। यस्य
ग्रहस्यद्वादशवर्गेकाक्रियते। सयदिपापग्रहोभवति। द्वादशवर्ग्यांपापग्रहाधिकवर्गंप्राप्तोभवव
ति। तदाअतिनिंद्यः। अत्यंतदुष्टफलदः॥ अथद्वादशभावानांशुभाशुभफलमाह॥ राशीशेति ४८
ततोलग्नस्यापिअनयेवरीत्याशुभग्रहाधिकवर्गेपापग्रहाधिकवर्गशालिलेनफलंविचार्यं। लग्नं
शुभग्रहाधिकवर्गशालिस्यात्॥ अथलग्नस्वामिशुभग्रहःयस्मिन्मित्रग्रहेस्वग्रहेवास्वोच्चेवा
तदाअत्यंतंशुभफलंज्ञेयं। यदिलग्नस्वामिसमग्रहेतदाशुभाशुभफलभावः। यदिलग्नंपापग्र
हाधिकवर्गाधिकशालीस्यादथवास्वामीपापग्रहःसन्शत्रुग्रहेनीचेवाअशुभफलंज्ञेयं। ए
वंसर्वेष्वपिभावेषुलग्नादिद्वादशभावेषुवर्गचक्रंद्वादशवर्गिकाकाकार्यं। तांदृष्वातत्तद्भावस्य
शुभाशुभफलंअनयेवरीत्याऊहनीयंविचारणीयं। इतिद्वादशवर्गिका। अथलग्नंविचार्य
मित्यतआह। शरीरेति ४७ वर्षलग्नंप्रश्नलग्नंवाअंगीकृत्यशरीरादिसर्वंविचारयेत्। स्वश

रारक्तशेपुरुषेवावर्णः।रक्तश्वेतरित्यादि।विक्रमशकादि।आयुर्जीवनंकियत्।वयोमानंवात्मं।योवनंवाऽकृतिः।सुखदुःखं
जातिःब्राह्मणादिः।शीलमावरणं।एवंमतिमानबुद्धिमानलग्नात्सर्वंविचारयेत्। अथधनभावेकिंविचार्यमित्यतआह।सु
वर्णरूप्यरत्नानिधातुद्रव्यंसखार्थंने।।सुवर्णरूप्यरत्नानिधातुगोरिकादिःद्रव्यंकादिःस्वामित्रीविचारः।धनेधनभवनेएतावद्विचार्यं। अथसहजभवनेकिंविचार्यमित्यतआह।विक्रमेसहजभवनेएतावद्विचार्यं।भ्राता सहजः।
भृत्यसेवकः।अथचायात्रा।पित्रंपितुःसंबंधिस्वजनेकार्यभेदाः।सारूप्यसादृश्यकर्म।एतानिसहजभवनाद्विचार्याणि।अथसव
र्थभवनेकिंविचार्यमित्यतआह।पित्र्यवित्तंनिधिक्षेत्रंगृहभूमिंचतुर्यतः।पित्र्यवित्तंपितृद्रव्यं।निधिःनिक्षिप्तंधनं।क्षेत्रंकृष्या
दियुक्तंगृहभूमिःतुर्यतःचतुर्थस्थानेएतावद्विचार्यं। अथपंचमभवनेकिंविचार्यमित्यतआह।पुत्रंमंत्रधनोपायगर्भंविद्यात्म
जेक्षणं।४९।पुत्रेपंचमभवनेएतावद्विचार्यं।मंत्रःमंत्रणं।धनंपापः।गर्भःविद्या।आत्मजःपुत्रः।एतेषांईक्षणं।।अवलोकनंकार्यं।अ
थषष्ठभावेकिंविचार्यमित्यतआह।रिपोमातुलमाद्यारिंचतुष्पाद्व्रणंभीव्रणान्।रिपोःषष्ठभावेएतावद्विचार्यं।मातुलःमाद्य
रोगः।अरिःशत्रुः।चतुष्पाद्वाहनादि।बंधःपराजयः।भीःभयं।व्रणःक्षतं।।अथसप्तमभवनेकिंविचार्यमित्यतआह।।द्यूनेकल
त्रंवणिज्यंति५०व्याख्या।द्यूनेसप्तमभवनेएतावद्विचार्यं।कलत्रंस्त्रियः।वणिः श्रीः
ज्यंवणिक्कर्म।नष्टंनष्टवस्तुविस्मृतिःविस्मरणं।एतेषांकथाकथनं।हतंहतद्रव्यंतस्यअध्वामार्गविचारः।कलिःकलहवि २२
चारः।अथअष्टमभावेकिंविचार्यमित्यतआह।मृत्यौचिरंतनद्रव्यंमृतवित्तंरणेरिपुः।दुर्गस्थानेमृतिर्नष्टंयश्चिरोमनोव्य
था।मृत्यौअष्टमस्थानेएतावद्विचार्यं।चिरंतनंद्रव्यंप्राचीनद्रव्यं।मृतवित्तं।रणःसंग्रामः।रिपुःशत्रुः।दुर्गस्थानेमृतिर्मरणं।

२४मार्गादियात्राविचारः।द्यूनेसप्तमभवनेशुभःशुभग्रहःशुभफलदः।पापोवाविद्यमानोयदिःअशुभइतिनष्टफलदः।८४२

DR BHAU DAJI

नष्टंनष्टवस्तुपरिवारः।मनेव्यथामानसीव्यथा।अथनवमस्थानेकिंविचार्यमित्यतआह धर्मेरतिरिति।५२व्याख्या।धर्मेन
वमस्थानेएतावद्विचार्यं इतिक्रीडापंथयात्राविचारः।धर्मोपायंधर्मसाधनं।अथदशमस्थानेकिंविचार्यमित्यतआह।व्योम्निः
मुद्रोपरंपुण्यंराज्यंद्विपेतरं।व्योम्निदशमभावेतावद्विचार्यं।मुद्राराजमुद्रा।परंपुण्यंउत्कृष्टंपुण्यं।राज्यंद्विपंभाग्यंद्व
द्विपेतरंपितुःसंबंधिः।अथैकादशभवनेकिंविचार्यमित्यतआह।आयेसर्वार्थधान्यार्घंकन्यामित्रंचतुष्पदः।५३व्या
ख्या।राज्ञोवित्तंपरिवारोलाभपापश्चभूरिशः।आयएकादशस्थानेएतावद्विचार्यं।सर्वार्थाः।सर्वेऽप्यर्थाःप्रयोजनं।धान्यार्घः।
धान्यामोल्यंकन्यामित्रंचतुष्पदाः।गजाश्वादिराज्ञोवित्तं।सज्यद्रव्यं।परिवारोकुटुंबविचारः।भूरिशःभूयांशोलाभापा
पाःप्राप्तुपापाःपापाः।।अथव्ययभवनेकिंविचार्यमित्यतआह।वैरंविरोधः।शत्रुकृतावरोधः।आर्तिःपीडा।व्ययादिए
तावद्विचिंतयेत्। अथबलिग्रहलक्षणमाह।लग्नेति।५५व्याख्या।लग्नं।अंबुचतुर्थं।द्यूनंसप्तमंकर्मदशमं।एतेषांस्थाना
नांकेंद्रंकटंचतुष्टयंचेतिसंज्ञाकृता।अत्रकेंद्रस्थितःखेटग्रहोबलीज्ञेयः।चतुर्थसप्तमदशमस्थानायेलग्नसंस्थाग्रहा
विशेषबलीज्ञेयः। अथग्रहाणांशुभस्थाननिर्देनबलिष्ठयोगंचाहु।लग्नेकर्मेति।५६व्याख्या।लग्नेकर्मदशमं।अस्त
सप्तमं।तुर्यंचतुर्थं।आयःएकादशं।सुतंपंचमं।अंकंनवमं।एतत्स्थानस्थितोग्रहोबली।तत्रयथोदयमादिमंस्थानम
तिक्रम्ययथाक्रमं।अग्रिमस्थानापेक्षयापूर्वस्थोग्रहोविशेषेणबलिष्ठः।तथाव्याख्या।आदौनवमस्थोग्रहोब
लिष्ठः।तदपेक्षयापंचमस्थोबलिष्ठः।तदपेक्षयाएकादशस्थः।तदपेक्षयाचतुर्थस्थः।तदपेक्षयासप्तमस्थः।तदपेक्ष

क्षेयादशमस्थः।तदपेक्षयालग्नस्थः।बली।इत्यर्थः।एतच्चसर्वग्रहाणांसाधारणबलमाह।अथचंद्रःसवित्रित्रिषु।तृतीयसहिते
षूर्वोक्तेषुस्थानेषुबलीवेज्ञेयः।तत्रद्वितीयबलिष्ठश्चंद्रः।तदपेक्षयातृतीयबलिष्ठः।तदपेक्षयानवमस्थः।तदपेक्षयापंचमस्थः
।तदपेक्षयाएकादशस्थः।इतिपूर्ववज्ज्ञेयः।अथभौमइति।५७।दीप्तांशेतिभौमःसवित्रितीयस्थानसहितेषुप्रागुक्तेषुब
लीवज्ज्ञेयः।तत्रभौमःतृतीयबलिष्ठः।तदपेक्षयानवमस्थः।ततःपूर्ववज्ज्ञेयं।एवंएतत्स्थानस्थग्रहदृष्टक्षायांप्रभलग्ने।सतोजन्म
नि।अन्यवर्षलग्नादेवाचिंतयेत्।इच्छमुनाप्रकारेणनवमसंख्याकाभाषाशस्ताःशुभफलदास्युः।ग्रहाधिष्ठितादृष्टाश्च
जलराशयःस्युः।इमेदशास्तमषष्ठभावाधिष्ठितग्रहादीप्तांशान्।अतिक्रम्यवर्त्तेरन्ततदातेपिराशयःशस्ताःशु
भफलदास्युरितिविचिंतयेत्।तत्रापिअधिष्ठितग्रहदीप्तांशमध्येइमेरिष्टास्तमरिपुभावाःयदिस्युः।तदेवअनिष्टाइत्य
र्थः।।अथत्रराशीकस्वामिनआह।।त्रिराशिपइति।५८।व्याख्या।दिनेदिवावर्षप्रवेशेऽतुर्णांराशीनांसूर्यस्तितार्किभृक्वाः
स्वामिनःस्युः।यदावर्षप्रवेशेमेषलग्नेतदासूर्यः।मिथुनस्थार्कःशनिः।कर्कस्थभृक्वाः।निशारात्रौवर्षप्रवेशेमेषादीनां
चतुर्णांराशीनाइत्येंदुबुधःकर्कस्थक्ष्मासुताःस्वामिनः।यथारात्रौमेषलग्नेस्वामीगुरुः।वृषस्थचंद्रःमिथुनस्थबुधः।कर्क
स्थभौमः।एतेरात्रौसिंहाद्यतुर्णांराशीनांविलोमंविपरीतंज्ञेयः।मेषादिनांयेदिनेशाः।तेसिंहादिनांरात्रावीशाःयेमेषा
दीनांराशीशाःतेसिंहादिनांदिनेशाइत्यर्थः।तद्यथा।दिनेसिंहलग्नस्यगुरुः।कन्यायांचंद्रः।तुलायाःबुधः।वृश्चिक
स्थभौमः।तथारात्रौसिंहस्यसूर्यः।कन्यायःशुक्रः।तुलायाःशनिः।वृश्चिकस्थशुक्रः।परेषुधनुरादिषुचतुर्षुराशिषु

मे	वृ	मि	क	सिं	कं	तु	वृ	ध	म	कुं	मी
र	शु	श	शु	गु	चं	बु	मं	श	मं	वृ	चं
गु	चं	बु	मं	र	शु	श	शु	श	मं	वृ	चं

श्रीः १३

नित्यंसदादिवारात्रौवर्षप्रवेशेऽर्किकुज्येज्यचंद्राःस्वामिनःस्युः।यथाधनुषःशनिः।मकरस्थभौमः।कुंभस्थगुरुः।मीनस्थ
चंद्रः।अनयोर्दिवारात्रौवर्षप्रवेशेसतिविपर्ययोनास्तीत्यर्थः।चक्रम्।अ
थैतस्यप्रयोजनमाह।वर्षेशार्थंइतिद्व०।व्याख्या।एतेवर्षेशार्थंप्रवेशनिर्णया
र्थंदिननिशाविभागेत्रिराशिपाउक्ताः।पंचवर्गबलाद्यर्थंपूर्वोक्तांडेक्काणेशान्
विचिंतयेत्।अथक्रमप्राप्तमुदाहरणं।प्रदर्शनार्थंवर्षतंत्रोक्तवर्षेशनिर्णयंतु
भिल्लोकेराह।।तत्रादेऽधिकारिणंआह।जन्मलग्नपतिरद्दजन्मपोमुथशाधिपइतित्रिराशिपः।सूर्यराशिपतिरद्दचंद्रमा
धिश्वरोनिशाविमृश्यपंचकंइति।व्या।जन्मलग्नपतिःजन्मलग्नस्वामी।मुथशाधिपोमुंथास्वामी।त्रिराशिपःत्रैराशिकस्वामी।
सूर्यास्तार्कभृक्वाइत्यादिनात्रैराशिकेश्वरोज्ञेयः।अद्ददिवावर्षप्रवेशेसूर्यराशिपतिर्दिनेशोज्ञेयः।निशिरात्रौवर्षप्रवे
शेसतिचंद्रमीश्वराः।चंद्राधिष्ठितराशीशोज्ञेयः।सएवरात्रिस्वामीज्ञेयः।अनयोरित्थंग्रहंविमृश्यविचार्यमेषंपंचाधि
कारिणोज्ञात्वा।तेषांदृग्बलंपंचवर्गबलंज्ञात्वावर्षपतिनिर्णयमाह।बलीयइति।२एषांपंचानामाधिकारिणांमध्येया
ग्रद्बली।पंचवर्ग्यांबलाधिकः।तनुलग्नंईक्षमाणःयत्पश्यतिसवर्षेयोवर्षस्वामीज्ञेयः।बलिष्ठोपिग्रहःलग्नंअनीक्ष
माणः।लग्नंनपश्यति।तदावर्षाधिपोनेवस्यात्।यदाबलस्यसाम्यपंचवर्ग्यांसर्वतुल्यबलास्तदादृमतिरेकतःस्यात्
।यथायरधिकदृस्यात्लग्नंपश्यतिसवर्षाधीशत्येवमाद्याविदुर्भवंति।दृक्साम्येवाह।दृगतेति।२सर्वेषांदृक्साम्येदृक्साम्येचदृश

ष्टाद्बलसाम्येऽथवानिर्बलेवर्षाधिपःवर्षेश्वरःमुंथहेश्वरःस्यात्।वेसंवाधिकारिणःसबला।यद्यपितनुर्लग्नंनेक्ष्यमा
णः।नपश्यतितथापिवीर्याधिकःअंकतःयस्येषबलमधिकंसएवअद्दस्यवर्षस्यविभुःस्वामीविचिंत्यः।अथकेनवि
न्मतेनदृष्टिबलसाम्येवर्षाधिपतिर्निर्णयमाह।बलीतिः।व्याख्या।बलसाम्येआदिशेद्दृष्टिसाम्येवअर्कादिवावर्षप्रवेश
रविर्राशेयःरव्यांकांतराशीश्वरोवर्षेश्वरोज्ञेयः।निशिरात्रौवर्षप्रवेशेइंदुरांशीइंदवंद्रांकांतराशीश्वरोवर्षाधीश्वरोज्ञेयमिति
केचिदाहुः।अथोक्तराशेर्विशेषमाह।येनेत्यशालइतियदिउक्तप्रकारेणराशेवंद्रंदृष्ट्वाविभुःवर्षस्वामीजातःसयदियेनपं
चाधिकारिमध्यस्थितेनग्रहेणासदृष्टशालंकुरुतेतदासएववर्षाधिपःवर्षस्वामीकल्यःअन्यथात्वेमुंथशालयोगाभा
वेवंद्रंउभयश्चंद्रांकांतराशीश्वरोवर्षाधीशोज्ञेयः।।अथमुंथानयनमाह।वेतिः।व्याख्या।यदाजन्मजातंतस्मिन्समयेयल्लग्नं
तदेवमुंथदृ।सामुंथदृस्वजन्मलग्नात्प्रतिवर्षमेकैकराशिवृद्ध्याभ्रमणितद्यथा।जन्मलग्नंकन्याजन्मसमयेतत्रेवमुंथ
दृाद्वितीयवर्षेतुलायामित्यादिमुंथदृास्त्रिप्रकारदृष्टवर्षंभवति।अथमुंथदृानयनं।राश्यादिस्वजन्मलग्नेयातशरद्युतेजन्म
कालाद्गतवर्षगणनयुतेद्वादशभिस्तक्षं।साशेषत्रिमिताभमुखाराश्यादिरिष्टवर्षेमुंथदृामुग्रदृस्यात्।उदाहरणंजन्मलग्नं १५ श्रीः
१०।५३।५०गतवर्षगणनयुते४२।१०।५३।५०द्वादशभिस्तक्षं।शेषांकत्रिमिताजाताराश्यादिर्मुंथदृा६।१०।५३।५०अथराशा १४
मुखस्थपुच्छानांलक्षणमाह।भाग्येति।यस्मिन्राशेतेराहुराहुरस्तिगतवक्रागतिनायेसाग्र्याअंशास्तेमुखसंज्ञाःयेग
तालवाःभुक्तलवाःतेपुच्छसंज्ञाः।ततःसप्तमंभवनंसप्तमंराशिःपुच्छसंज्ञकेति।किमर्थंविवार्यमुंथदृाफलंवदेत्।अथो

रूपकोरणावर्षशनिर्णयः।तत्रादेजन्मलग्नेशोबुधःवर्षलग्नेभौमः।मुंथदृेशोभृगुः।त्रैराशिकेशःसूर्यः।दिनेशःशनिः।पंचानांमध्ये
बलिष्ठःशनिः।पूर्णोलग्नदृष्ट्यापश्यति।अतोवर्षेशःशनिः।।इतिदिवाकरदैवज्ञोमजीविश्वनाथदैवज्ञविरचिते नीलकंठज्योतिर्विदृत्ते
संज्ञातंत्रेग्रहाध्यायस्यव्याख्यादाहरणंसमाप्तं।।राशिस्वरूपइति।।अथग्रहस्वरूपमिति।सूर्यइति।व्याख्या।सूर्यएतादृशोज्ञे
यः।नृपःक्षत्रियःनापुरुषःचतुष्कोणाकृतिःमध्यंदिनंमध्यदृकालेप्रबलःइंद्रदिक्पूर्वदिक्स्वामी।सुवर्णद्रव्यस्वामी।अथगजा
दीनांप्रभुः।क्रूरःसत्वप्रधानःस्थिरस्वभावःतिक्तरसप्रियः।गाभूमिचारी।पित्तप्रकृतिःदृढःश्वेतरक्तमिश्रितवर्णःमूलेसन्मस्य
धान्यादरधिष्ठाताधनचारी।एवंगुणविशिष्टःसूर्यः।अथचंद्रस्वरूपमाह।वैश्यइति।चंद्रः।वैश्यजातिःस्त्रीग्रहःराड्भूमिचारी।
तपस्वी।गौरः।अपराह्णकालेप्रबलः।श्वेतवर्णःभूजलचारी।धातुःगौरिकादिःसत्वप्रधानःवायव्यदिक्स्वामी।श्लेष्मप्रधानः
भुजंगःभुजंगस्वामी।रूपद्रव्यस्वामी।अतिपुष्टःतरुणःलवणरसप्रधानःशुभग्रहः।शुभ्रवर्णः।२ अथभौमस्वरूपमाह।
भौमेति।एतादृशोभौमःतमोगुणप्रधानःपित्तप्रकृतिःतरुणःक्रूरःवनचारीमध्यदृकालेप्रबलःगौरिकादिःदक्षिणो
दिक्स्वामी।।अथार्दीनांप्रभुःपुरुषःक्षत्रियःचतुष्कोणाकृतिःसुवर्णकाराणांस्वामी।ज्वलितभूमिचारी।किंचिदंगरहितः।
कटुरसप्रियःतास्रवर्णप्रियःरक्तद्रव्यस्वामीनित्यं३ अथबुधस्वरूपं।ग्राम्येति।ग्राम्यचारी।सौम्यःनीलवर्णोद्रव्यस्वामी।
दृनावतुल्याकृतिःशिशुःईशकोद्यसंचारी।समधातुर्वातपित्तकफात्मकः।जीवोमनुष्यादिः।शरदृतुनस्थलचारीस्त्री
ग्रहःउत्तरदिक्स्वामी।प्रभातकालेप्रबलःशूद्रवर्णःपक्षिजातिःसर्वरसःकटुतिक्तसकलरसप्रधानःरजोगुणप्रधानः।

नो बुधः। एवंगुणविशिष्टोज्ञेयः॥८। अथगुरुस्वरूपं। गुरुरिति। एतादृशोगुरुः प्रभातकालेप्रबलः। पुरुषः। सौम्यग्रहः। ईशान्यदिक्स्वामी। ब्राह्मणवर्णः। पीतवर्णः। द्विपदादीनां मनुष्यादीनांस्वामी। ग्रामचारी। वर्तुलाकृतिः। जीवोमनुष्यादी। कणिकर्मकर्त्ता। मधुररसप्रियः। देवतागृहस्वामी। वृद्धग्रहः। रत्नद्रव्यस्वामी। वातपित्तकफात्मकः। सत्वगुणप्रधानः। अथशुक्रस्वरूपं। शुक्रः शुभःस्त्री। जलगेति। एतादृशःशुक्रोज्ञेयः। शुभ्रग्रहः। स्त्रीः। जलचारी। अपराह्णकालेप्रबलः। शुभ्रवर्णः। कफप्रकृतिः। रूप्यद्रव्यस्वामी। रजोगुणप्रधानः। आम्लरसप्रियः। मूलोत्पन्नस्यधान्यादेः स्वामी। ब्राह्मणवर्णः। आग्नेयदिक्स्वामी। युवावयः। तरुणः। रतीशः। कीडासेरप्रधानः। जलभूमिचारी। स्निग्धरुचिः। श्लक्षकांतिः। द्विपदानांमनुष्यादीनांस्वामी। ६। अथशनिःस्वरूपं। शनिरेतादृशःपश्चिमदिक्पतिः। वायुःवनचारी। मध्याह्नकालेप्रबलः। श्यामवर्णः। स्त्रीः। धातुसमः। वातपित्तकफात्मकः। स्थिरस्वभावः। पापग्रहः। पश्चिमदिक्स्वामी। कषायरसप्रियः। अतिदृढः। उत्कटभूमिस्वामी। दीर्घाकृतिः। सुष्ठुनीलवर्णः। लोहधातुस्यस्वामी। ७। तत्वरादुस्वरूपं। शनिवत्। राहुस्वरूपमिति। निषादश्चाऽतिविशेषः। सर्पस्वरूपः। अस्थिस्वामी। नैर्ऋतिदिक्स्वामी। अथकेतुस्वरूपं। शनिवत्। परंत्वेतावान्विशेषः। शिरोवान्। अनेकरूपः। इत्थमनुनाप्रकारेणग्रहस्वरूपात्फलमूह्यं ज्ञेयं॥ अथदृष्टिमाह। तत्रयुग्मानांचतुर्द्वादृष्टिः॥ एकाअत्यासन्नदृष्टिः। द्वितीयासुसन्नदृष्टिः। तृतीयासुसन्नवरदृष्टिः। चतुर्थीअत्यासन्नवरदृष्टिः। तत्रोदासीनदृष्टिमाह। उदासीनदृष्टिरिति। ए कुड्यांग्रहः स्वाक्रांतस्थानात्। नवपंचमेनवपंचमस्थानस्थंपश्यति। नवपंचमस्थानस्थवाग्रहंपश्यति सादृष्टिर्बलवती। प्रत्यक्षतः सन्नदाप्रीतिदात्री। पादोनासादृष्टिः। चतुर्थांशन्यूनाषट्चत्वारिंशत्कलिका४५अखिलानां

रुमध्यरविंविशोध्यःचंद्रयोगःकार्यः। उक्तयारीत्यागौरवसहमंभवति। शोध्यर्क्षशुध्याश्रयमांतरालेकमेणदिवारात्रेोसूर्यचंद्रोनचेत्तदासैकताका
र्येत्यर्थः। दिनेवर्षप्रवेशेआर्षेःशनिमध्येऽर्कसूर्यंविशोध्यंनिशिरात्रेोवामंविपरीतंसूर्यमध्येशनिमयास्यलग्नयोगःसैकताचकार्या। राज्ञतातस
हमंभवतः। अत्रोदाहरणं। गुरुमध्ये८।२९।३५।१३। चंद्रे५।२२।९।४७। शोधितेशेषं३।७।३५।२६। रवि९।७।३०।६। युतंसैकंजातंगौरवसहमं
७।१४।५५।३१। शनिमध्ये६।६।४८।१४ सूर्ये९।७।३०।६ शोधितेशेषं८।२९।१८।४८ लग्नयुतंजातंराज्ञसहमं९।१७।२२।४२ तातसहमंच९।१७।
२२।४२। अथमातृपुत्रजीवतानुसहमानांसाधनमाह। मातृंदुताद्दिवा११दिवसेंदुतः चंद्रमध्येसितंशुक्रंअथास्यसंशोध्यंविलोमंनक्तं। रात्रेशुक्र
मध्येचंद्रः शोध्यः। लग्नयोगः सैकताचकार्या तन्मातृसहमंभवति। अहर्निशं। दिवारात्रेोचगुरुमध्येचंद्रंविशोध्यः। लग्नयोगसैकताचकार्या
तत्पुत्रसहमंस्यात्। अथाह्निदिवंसशनिमध्येगुरुशोध्यरिंनिशिवामंगुरुमध्येशनिः शोध्यः। लग्नयोगः सैकताचकार्या। तज्जीवताख्यंसहमं
स्यात्। अंबयासहमंमातृसहमतुल्यमंबुसहमंज्ञेयं। उदाहरणं। चंद्रमध्यशुक्रेशोधितंशेषं। ९।२७।३७।५९। लग्नयुतंजातंमातृसहमं १०।१५।
४१।५३। गुरुमध्येचंद्रंशोधितंशेषं। ३।७।२५।२६। लग्नयुतंसैकंजातंपुत्रसहमं। ४।२५।२९।२०। शनिमध्येगुरुःशोध्यतेशेषं।९।७।१३।४१। लग्ने
युतंजीवितसहममाख्यं। ९।२५।१७।३५ मातृसहममंबुसहमं। १०।१५।४१।५३। अथकर्मयोगमन्मथसहमानांआनयनमाह। कर्मज्ञमारान्निशी
ति। १२। दिवाभौममध्येबुधःशोध्यः निशिरात्रेोवामंबुधमध्येभौमः शोध्यः लग्नयोगः सैकताचकार्यातत्कर्मसहमंस्यात्। सदैवदिवारात्रेोवर्षप्र
वेशमति। ननुतः लग्नमध्येचंद्रःशोध्यः लग्नयोगः सैकताचकार्यातद्रोगसहमंस्यात्। दिवसेचंद्रमध्येलग्नस्वामीशोध्यः वामंनिशि। लग्नस्वामि

मध्येचंद्रःशोध्यःलग्नयोगःसेकताच।तन्मन्मथोमदनःतस्यसहमंस्यात्।इंदुतनुपंलग्नस्वामीचंद्रश्चेत्तदाहोरात्रमर्कोलग्नस्वामीचंद्रःशोध्यःलग्न
योगःसेकताचकार्यातन्मन्मथसहमंस्यात्।उदाहरणं।मीनमध्येबुधेशोधितेशेषं।०।२।१६।२८।लग्नयुतंसेकजातंकर्मसहमं।१।२०।२०।२२।लग्नम
ध्येचंद्रेशोधितेशेषं।२५।५४।१।लग्नपुंकार्यंरोगसहमंभवेत्।१।१३।५८।११।चंद्रमध्येलग्नस्वामीनिशोमेशोधितेशेषं।९।१।३१।लग्नयुतंजातंम
दनसहमं९।२५।४१।५।अत्रकलिरक्षमाशास्त्रसहमानयनमाह।कलिक्षमेस्त्रीइति।०दिवागुरुमध्येभौमःशोध्यःविलोमंनिशि।भौममध्येगुरुःशो
ध्यः।पूर्वरीत्येति।लग्नयोगःसेकनाचकार्यातत्कलिसहमंचभवति।दिनेगुरुमध्येशनिःशोध्यः।रात्रौशनिमध्येगुरुःशोध्यः।ज्ञस्ययुतेःबुधयोगःका
र्यः।पुरावदिति।शोध्यक्षशुध्याश्रयभांतरालेबुधोनचेत्तदासेकताचकार्यः।तच्छास्त्रसहमंस्यात्।अत्रोदाहरणं।गुरुमध्येभौमशोधितेशेषं०।१५।२।
३७।लग्नयुतंसेकताजातंकलिसहमं २।३६।३१क्षमासहमंच।२।३६।३१।गुरुमध्येशनौशोधितेशेषं २।२२।४६।१९।बुधयुतशास्त्रसहमं ११।५।
२७अथमंबुवंदकमृत्युसहमानयनमाह।दिवानिशंज्ञाच्छशिनंविशोध्यवंध्याख्यमेतन्निशिवंदकंस्यात्।वामंद्विनन्मृतिरष्टमर्क्षादिंदुविशोन्नव
दाकिंयोगात्।१४दिवारात्रौवर्षप्रवेशसति।बुधमध्येचंद्रःशोध्यःलग्नयोगःसेकताचकार्या।तद्बुधसहमंस्यात्।एतद्बुधसहमंनिशिवर्षप्रवे
शश्चेत्तद्वंदकसहमंस्यात्।एतद्दिवावामंविपरीतं।चंद्रमध्येबुधःशोध्यःलग्नयोगःसेकताचवंदकंस्यात्।दिवारात्रौवर्षप्रवेशसति।अष्टमर्क्षा
दष्टमभावमध्येचंद्रःशोध्यः।शनियेज्यः।उक्तवत्सेकताकार्यामृतिसहमंस्यात्।अत्रोदाहरणं।बुधमध्येचंद्रेशोधितेशेषं २।२०।६।२१।लग्नयुतं
जातंबुधसहमं४।८।१०।१५चंद्रमध्येबुधशोधितेशेषं ९।१।५३।३१।लग्नयुतंजातंवंदकसहमं०।२७।५७।३३।अष्टमभावमध्ये७।१३।४५।१६।
चंद्रशोधितेशेषं १।२१।३५।२९शनियुतंजातंमृत्युसहमं७।२८।२४।२३।अथदेशांतरार्थसहमयोरानयनमाह।देशांतरास्यैतिष्यसततंदिवास

बुधमिति।दिवसेगुरुमध्येबुधःशोध्यः।निशिवामं।लग्नयोगःसैकताचप्रसूतिसहमंस्यात्।सैदेवंशनिमध्येचंद्रःशोध्यःषष्टंशिवेतासैकताचकार्यःस
तत्सतापसहमंस्यात्।लग्नयोगःसैकताचकार्यःतस्यानीयपातसहमंस्यात्।उदाहरणं।गुरुमध्येबुधशोधितशेषं०।१७।१९।५।पूर्ववत्स्यात्इति।
लग्नयुतंप्रसूतिसहमं२।५।२२।१९।शनिमध्येचंद्रशोधितशेषं०।१४।३९।रविभावेनयुतंसैकजातंसंतापसहमं।६।२८।२३।२४।शुक्रमध्येभौमे
शोधितशेषं११।९।५९।१२लग्नयुतंजातंश्रद्धासहमं११।२८।३।६।विद्यासहममध्येपुण्यसहमंशोधितशेषं।८।०।४०।३८।लग्नयुतंजातंप्रीतिसहु
मं०।१४।९।३२।भौममध्येशनौशोध्यतशेषं२।२।४३।४२।बुधयुतंजातंजाड्यसहमं१०।१२।५९।५०।भौममध्येशोधितशेषं०।२।१६।२८।लग्नयु
तंसैकंजातंव्यापारसहमं१।२०।२०।२२।शनिमध्येशोधितशेषं०।१४।३९।७।लग्नयुतंसैकंजातंयानीयपातसहमं२।२।४३।१।अथशत्रुशौर्यापं
यसहमानयनमाह।मंदैकुजात्मोक्ष्यरिपुर्विलोमंरात्रौभवेद्भौमविहीनपुण्याच्छौर्यंविलोमं।निशिपूर्ववत्स्यादुपायईज्यंशनितोविशोध्य२१दिवसे
भौममध्येशनिःशोध्यः।रात्रौविलोमं।शनिमध्येभौमःशोध्यः।लग्नयोगःसैकताचकार्या।तद्रिपुसहमंस्यात्।दिवसेपुण्यसहममध्येभौमःशोध्यः
रात्रेर्भौममध्येपुण्यसहमंशोध्यंपूर्ववत्स्यादिति।लग्नयोगःसैकताचकार्या।शौर्यसहमंभवति।उपायईज्यं।शनितोविशोध्यइत्यग्निमरुलोकेनसं
बंधः।अथदारिद्र्यगुरुतासहमयोरानयनमाह।वामंनिशिज्ञंतुविशोध्यपुण्यात्।ज्ञयुग्विलोमं।निशितद्दरिद्रं।सूर्यान्वितःसूर्यमपास्यनक्तं
चंद्रंतदुच्चद्गुरुकापुरोक्ता।२२दिवसेशनिमध्येईज्योगुरुःशोध्यः।रात्रौगुरुमध्येशनिःशोध्यः।लग्नयोगःसैकताचकार्या।तदुपायसहमंस्या
त्।दिवसेपुण्यसहममध्येबुधःशोध्यःबुधयोगःकार्यः।रात्रौबुधमध्येपुण्यसहमंशोध्यंबुधयुक्तंकार्यंसैकताचकार्यं।तद्दरिद्रियसहुमं
स्यात्।दिवसेसूर्यान्वितमध्ये।०।१०।सूर्यःशोध्यः।रात्रौचंद्रोन्वितमध्ये१।३।चंद्रःशोध्यः।पुरोक्त्या।लग्नयोगःसैकताचकार्या।तद्गुरुतासहुम

स्यात्।अत्रोदाहरणं।भौममध्येशनौशोधितशेषं२।१।४३।४२।लग्नयुतंसैकंजातंशत्रुसहमं३।२५।४१३९।पुण्यसहममध्येभौमशोधितशे
षं०।१८।१०।२९लग्नयुतंसैकंजातंशौर्यसहमं२।।६।१४।।५३।।शनिमध्येगुरुशोधितशेषं९।।७।।१३।।४१।।लग्नयुतंजातमुपायसहमं।।९।।
२५।१७।।३५।।पुण्यसहममध्येबुधशोधितशेषं०।२०।।२७।।२३।।बुधयुतंदारिद्र्यसहमं।९।।२।।४३।।३५।।सूर्यान्वितमध्य०।।१०।।सूर्यशोधि
तशेषं२।।२।।२९।।५४।।लग्नयुतंसैकंजातंगुरुसहमं९।।३।।२३।।३३।।४८।।अथजलपथबंधनसहमयोरानयनमाह।।कर्कार्द्धतःप्राग्यश
निस्याज्जलाध्वान्यथानिशि।पुण्याच्छनिंविशोध्यार्द्धचंमनिशितुबंधनं।।२३।।दिवाकर्कार्द्धतःसार्द्धराशित्रयमध्य।३।१५।शनिःशोध्यः।अ
न्यथानिशि।रात्रौशनिमध्यसार्द्धराशित्रयं३।।१५।।विशोध्यं।लग्नयोगःसैकताचकार्या।।जलाध्वाजलपथसहमंस्यात्।।आर्द्रदिवसेपुण्य
सहममध्येशनिःशोध्यः।रात्रौशनिमध्येपुण्यसहमंशोध्यं।।लग्नयोगःसैकताचकार्या।।तद्बंधनसहमंस्यात्।।अत्रोदाहरणं।सार्द्धराशित्र
यमध्ये३।१५।।शनौशोधितशेषं।९।८।११।६लग्नयुतंजातंजलपथासहमं।९।२६।१५।०पुण्यसहममध्येशनौशोधितशेषं२।२५।५४।४१
लग्नयुतंसैकंजातंबंधनसहमं४।१३।५८।३५अथकन्याश्वसहमयोरानयनमाह।चंद्रःसितादयास्यात्कं।सदाकन्याख्यमुक्तवत्।पुण्या
र्कमपास्यायोगादश्वाऽन्यथानिशि २४।।मंदादिवारात्रौशुक्रमध्येचंद्रःशोध्यउक्तवदिति।लग्नयोगःसैकताचकार्या।तत्कन्यासहमंस्या
त्।दिवसेपुण्यसहममध्येसूर्यःशोध्यः।रात्रौसूर्यमध्यपुण्यसहमंशोध्यं।आयभावः।एकादशभावोयोज्यः।सैकताचकार्या।तदश्वसहमंस्या
त्।अत्रोदाहरणं।।शुक्रमध्येचंद्रशोधितशेषं२।।२।२२।१।।लग्नयुतंजातंकन्यासहमं३।२०।२५।५५।पुण्यसहममध्येसूर्यशोधितशेषं

	१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६	१७	१८	१९	२०	२१	२२	२३	२४	२५
	एक	द्व	त्रि	च	पं	ष	स	अ	न	द	ए	बा	त्र	चं	विना	यमसिद्धि	वार	सूत	बु	मं	गु	दन	लि	मा	स्व
	पु०	गु०	वि०	य०	मि०	मा०	आ०	मा०	स्त्रा०	गो०	रा०	ना०	मा०	पु०	जी०	का०	वि०	प्र०	अं	क०	शे०	म०	क०	क्ष०	शा०
	२	३	५	०	४	२	७	३	४	२४	७	७	१०	४	२५	३	३	२	०	०	१	२	३	३	१५
	४३	२४	२३	२४	२५	६	०	६	०	५५	२२	२२	४५	२५	२७	६	५	२२	४५	२०	१३	४१	६	६	२
	३५	१३		३२	२६	५३	०	३०	३	३५	४२	४२	५३	२०	३५	४३	४६	५१	५३	२२	५८	५	२१	३०	२७
	धु	द्व	त्रु	शोभन	न	न्यङ्कुस	नवमर्म	लिङ्ग	पात	ड्डी	ति	कु	हृ	ड्डी	पार	नीचपात	नृ	र्य	पाय	रिष्ट	हता	लूपथ	धन	न्या	श्व
	६	११	२८	२९	३०	३१	३२	३३	३४	३५	३६	३७	३८	३९	४०	४१	४२	४३	४४	४५	४६	४७	४८	४९	५०
	रं०	क०	म०	दं०	ध०	अं०	अ०	व०	सं०	श्र०	भ्री०	व०	दे०	जा०	ख्या०	पा०	श०	शो०	ऊ०	द०	गु०	ज्ञ०	बं०	क०	अ०
	४	८	७	२७	६	२१	०	२७	८	२८	२८	८	०	१०	२०	२	३	६	२५	३	३	९	४	३	२१
	८०	५१	२४	५५	२१	५५	३	५१	२४	२४	४४	५५	५०	३१	३१	४३	२५	१४	२१	४३	३३	२६	४८	२५	४०
	२५	३३	२३	२०	२२	२६	२७	३३	२३	६	३२	३२	३१	३०	१२	१	३६	५३	३५	५३	४८	०	३५	५५	७

सिंहलग्नद्वितीयभवनादि

त्यपाठस्तिष्ठति॥अस्मिन्पाठेमेकतामायाति।अत्रग्रंथकर्तालग्नद्वितीयभवनादितिपाठंध्रुवासहमेषुमेकताऽऽह्का।परंतुसमसिंहेनथामनुष्यजातके लग्नाद्वितीयभवनादित्येवपाठोऽस्ति।अस्मिन्पाठेमेकतानास्ति।एनेपुरस्कृत्यमंदैराचार्यैःसहमेषुमेकतानोक्ता।अत्रोदाहरणं।यदाहसमसिंहः।दि वसेदिनेप्रतिभोग्यानिशशिभुक्त्यनंशकान्समीकृत्य।अनस्थितराशियुतांस्त्रिंशत्प्रत्येकतः।हृतायद्यंतरराश्यंतर्नभवति।लग्नंतदास्यभुक्तांशाः मध्येभोग्यमध्यस्थितंतुभोग्यंशकाःपात्याः।लग्नाद्वितीयभवनात्त्रिंशत्यत्येकतःशोधिते।यत्रविश्राम्यति।तत्रर्क्षविज्ञेयंपुण्यसहमंमिति।दिव सेवर्षप्रवेशसति।सूर्यस्यराशित्यक्तांअंशादिकंस्थाप्यं।अंशास्त्रिंशद्गुणामध्येशोध्याः।कालादिकंषष्टिमध्येशोध्यमंशादिकंयदवशिष्टंतद्ग्राह्य तन्मध्येचंद्रस्यराशित्यक्तांअंशादिकंयोज्यं।तदनंतरंसूर्याधिष्ठितंराशेःसकाशादग्रिमोयोराशिःतस्मादूनयायत्संख्याकश्चंद्राधिष्ठितरा शेःसकाशात्पूर्वराशिर्भवति।तावंतःसंख्याःपूर्वनीतांशेषुपरिस्थापयाः।ततदनंतरंप्रत्येकतःकृत्वात्रिंशत्यत्येकंप्रत्येकमितित्रिंशत्यत्येकतः राशीनामंशाःकार्याः।अथस्थांसंयुता।तदनंतरंसूर्यराशिःसकाशात्तंचंद्रयावदनयोर्मध्येलग्नराशिश्चेन्नभवति।तदालग्नराशित्यक्ता अंशायोज्याः।अनयोर्मध्येलग्नराशिश्चेद्भवति।तदालग्नस्यभोग्यांशाःशोध्याः।तदनंतरंयदानलग्नस्यभुक्तांशाःयुक्ताः।तदालग्नाद्गुण नाक्रमः।यदालग्नस्यभोग्यांशाःशोधिताः।तदाधनभावात्।गणनाक्रमः।अनयारीत्यागणयानायांप्रतिराशौत्रिंशत्रिंशच्छोधिते।यस्मि न्राशौविंशन्नशुद्ध्यंतितस्मिन्राशौपुण्यसहमंजेयं।लग्नाद्वितीयभवनादितिपाठेसूर्यचंद्रयोर्मध्ये।लग्ननभवति।अथवाभवति।तदाध नभवनादेवगणनाक्रमः।ननुलग्नात्।अत्रोदाहरणं।सूर्यः २।७।३०।६।चंद्रः५।२२।१।४१।लग्न०।१८।३।५४।सूर्यस्यभोग्यांशाः।०।२२। २१।५४चंद्रस्यभुक्तांशाः २२।१।४१।युक्ताःजाताः४४।३१।४१।चंद्रसूर्ययोरंतरालराशिभिः।युक्ताःजातायमंशाराश्यादिः३।१४।३१।४१

अस्यांशाः १०४।३१।४। चंद्रसूर्ययोर्मध्येलग्ननास्तीति।कारणाल्लग्नस्यभुक्तांशैः १८।२।५४॥युक्ताःजाताः १२२।४३।४५।लग्नाद्भिंशत्यत्ये
कतःशोधितेज्ञाते।यदालग्नस्यभुक्तांशाःयुक्ताः।तदालग्नस्यभाग्यमवशिष्टमितिकारणात्॥लग्नाद्गणनाक्रमः।तत्रलग्नसंबंधःतिष्ठ
ति।कन्याराशौपुण्यसहमे ५।२।४३।३५अनयारीत्यासैकतासमायाति।एवंपाठद्वयेविवादः।लग्नाद्द्वितीयभवनादिति।पाठेएता
वतीयुक्तिरस्तिसिंहराशौपुण्यसहमे ७।२।४३।३५।धनभावाद्भिंशत्यत्येकतःशोधितेज्ञाते।यदालग्नस्यभाग्यांशाःशोधितास्तदालग्न
संबंधोनास्तीतिकारणाद्गणनाक्रमः।अत्रलग्नशब्दंकिमपिनास्ति।एतावतीयुक्तिरुक्ति।सर्वग्रंथेषुसंमतिरस्ति।समतेनभावाद्युक्तेर
भावाल्लग्नद्वितीयभवनादित्यतिपाठः।तयोश्चाक्रमनुष्यज्ञातके।भोग्याद्भुक्तममूनियावदस्तिलान्यंतभंयुक्तान्यते।लग्नेबाह्यगतेस्यभु
क्तसहितंभोग्योनमंतःस्थितेः।कृत्वारामपासिनेखदहनेर्लग्नाद्वितीयाद्भवेतस्युएयाद्यानिभवंति।तत्रसहमान्यसविरामोयतः॥अथस
हमानांफलानिव्याख्यायते।स्वाद्यादिसप्तदगतोयदिलग्नदशद्वितीयानितःसहमोयदिनेक्षतेगांनाशेबलीरविशशिश्रितमेशदर्श
पूर्णांतिलग्नयबलस्यविचारणार्थं २५सहमयःसमराशिस्वामीस्वाद्यादिस्वाद्यस्वगृहद्वासत्रेराशिकस्वमुसल्लुरणतत्स्थानस्थः।स न
र्थवासप्तदगतःशुभस्थानस्थःसन्यदिलग्नदशांलग्नंपश्यति।तदावीर्यान्वितःवीर्येणबलेनान्वितःयुक्तःबली इत्यर्थः।सहमस्वामी
स्वाद्यादिसप्तदगतः।सन्यदिलग्नंनेक्षतेनपश्यति।तदासौबलीनभवतिनिर्बलेत्यर्थः।रविशशीतिरविशशीताभ्यामाश्रितेभे
राशीतयोरीशौस्वामिनौ।तद्यथा।जन्मकालेसूर्ययस्मिन्नाशावस्ति।तद्राशिस्वामीतथाजन्मकालेचंद्रयस्मिन्नाशावस्ति।तद्राशि
स्वामीजन्मकालानीतामावास्यायावद्घटीपरिमितास्मिन्कालेतात्कालिकसूर्यलग्नेसाध्यं।तत्स्वामीतथाचजन्मकालानीतपूर्णतिल

ग्नस्वामीएतेषांबलस्यएवंविचारः।आयुर्दायज्ञानेआनयनेतथामनुष्यजातके।आयुर्दायानयनेएतेषांबलविचारस्योपयोगः।मकृतेपिपयो
जनाभावेपिप्रसंगादुक्तं।अथनिर्बलसबलबलक्षणमाह।पंचवर्गीबलेनोनोनहर्षस्थानमाश्रितः।अबलोयंलग्नदशाबलीस्वल्पेस्ति।चेत्यदे
२६पंचवर्गीबलंप्रागुक्तं।तेनडुनःशरोनोहीनबलरित्युक्तं।नंदत्रिषड्दित्यादिचत्वारिहर्षस्थानानिप्रागुक्तानि।तन्मध्येएकमपिहर्षस्थानंनआ
श्रितेः।तथालग्नंमदशालग्नमपिचेन्नपश्यति।तदायंग्रहरबलः निर्बलोज्ञेयः।चेत्स्वल्पेपदेस्ति।तदाबली।तद्यथा।स्वगृहस्वोच्चस्थानग्रहेसति
महाधिकारः।स्वहद्दायामध्यमोधिकारः।स्वत्रेराशिकेस्वमुसल्लुरेग्रहेसति।स्वल्पोधिकारः।अतेवप्राज्ञैर्बलतारतम्यमुक्तं।त्रिंशत्स्वल्पविंशतिरा
शमतुंगेइत्यादि।पदंस्थानं।एवंस्वल्पेपिपदत्रेराशिकमुसल्लुरणाख्येस्थानेस्थितेः।सलग्नपश्यति।तन्नदाबलीग्रहोज्ञेयः।एवंसहमाधियस्यबला
बलंज्ञात्वा।इदानींसहमस्यदृष्टिह्रासमाह।स्वस्वामिनाशुभखगैःसहितंचदृष्टंस्वामीबलीचयदितसहमस्यदृष्टिः।चेत्स्वामिनाशुभखगैश्च
नयुक्तदृष्टंतत्संभवेनाहिभवेदिति।चिंत्यमादो २७ यत्सहमंस्वस्वामिनासहतंदृष्टंवा।अथवाशुभग्रहैःसहितंदृष्टंवाभवति।यदिवागुक्तप्र
कारेणसहमस्वामीबलीस्यात्।तदातत्सहमस्यदृष्टिः।फलदात्वेसामर्थ्यंसहमस्यफलंकदाभविष्यतीति।ग्रंथकर्त्तानोक्तं।तच्चोक्तंगण
कचक्रचूडामणिभिः।श्रीकेशवदैवज्ञैः।अदृष्टेनयुतंभवेनसहमंवास्वदृष्ट्यान्वितं।सद्भिर्वासहमाधियस्यकिमिमंतत्स्वीयलाभप्रदमि
ति।किंसिमेदशायांसहमस्वामिदशायांफलंभवतीतिज्ञेयं।यत्सहमंचेत्स्वामिगं।अथवाशुभयग्रैर्नयुक्तंनदृष्टं।तदातत्सहमस्यनसहम
स्यनसंभवः।फलदात्वंतत्सामर्थ्यंनभवत्।नामसदृशंनददातीत्यर्थः।इतिओंदोप्रथमतःविसंविचार्यः।अथान्यसहमासंभवलक्षणमा
ह।अष्टमाधिपतिनायुतेइति २८ तत्सहमंवर्षलग्नाष्टमाधिपतिनाष्टराशिस्वामिनायुतंमीक्षितंदृष्टंवा।अथवापापग्रहेणयुतंदृष्टंवा।अ

ग्रयानेः।अष्टमराशिपापग्रहैर्वीक्षितशालिमुथशिलंकरोति।तदास्वस्वामिनाशुभग्रहैःसहितमित्यादि।सहमस्यफलप्राप्तिसंभवेपिविलंबेनाशंप्रयाति।सहमंनामससर्वेषांसहमानांबलाद्दशंफलंनददातीत्यर्थः।तेनकारणेनजन्मनिजन्मकापुराप्रथमतः।इदंसहमस्यबलाबलंवीक्ष्यतांविचार्यतां।अथबलिष्टसहमस्यसाधनेनिर्बलस्यनिराकरणमित्यतआह।आदौजन्मनिसर्वेषांसहमानांबलाबलं।विमृश्यसंभवोयेषांतानिवर्षाविचिंतयेत्।आदोप्रथमतःजन्मनिजन्मकालेसर्वेषांपंचाशत्सहमानांबलंबलंविमृश्यज्ञात्वायेषांफलप्राप्तिःसंभवः।तानिवर्षाविचिंतयेत्।येषांतुसहमस्वामिनांसर्वप्रकारेणनैर्बल्यंज्ञातं।तानिवर्षेकदापिनविचारयेदित्यर्थः।सिद्धं।सहमस्यशुभाशुभफलमागतंतदाशुभफलंवाच्यमित्यर्थः।एवमुक्तप्रकारेणसहमानांसबलत्वेसतिफलदात्वमुक्तं।इदासमस्तसहमानांफलान्युच्यते।तत्रादोपुण्यसहमस्यफलमाह।सबलेपुण्यसहमेधर्मसिद्धिर्धनागमः।शुभास्वामीक्षितयुतेथस्वयंव्ययःविदुः।सबलेपुण्यसहमेसतिशुभग्रहैःस्वामिनावेक्षितयुतेसतिधर्मस्यसिद्धिः।धनागमः।धनप्राप्तिः।व्ययेसहमस्यनिर्बलेसतिपापग्रहयुक्तदृष्टेसतिव्ययेधर्मनाशः।धननाशश्चेतिफलंविदुःवदंति।अथास्याशुभफलमाह॥लग्नात्वष्टेति३वर्षलग्नात्वाष्टद्वादशस्थानस्थंपुण्यसहमंयदाभवतिसपूर्णेवर्षपर्यंतंधर्मभाग्ययशसांनाशकं।एतत्स्थानस्थितंसच्छुभग्रहेणस्वामिनावादृष्टंतदाप्रांतेवर्षांतेसत्संबंधमितिदेसंभवःप्राप्तिःस्यात्।अर्थाद्वर्षपूर्वार्द्धेअशुभफलदं।अथपापशुभग्रहसंबंधेनयुतिदृष्ट्योःफलमाह। पापयुक्तशुभग्रहदृष्टंचेदशुभंप्राक्तनःशुभं।शुभयुक्तपापदृष्टमारोशुभमससरे३२तत्पुण्यसहमंपापयुक्तंशुभदृष्टंचचेद्भवति।तदाप्राक्वर्षस्यपूर्वार्द्धेअशुभंभवेत्।ततवर्षस्योत्तरार्द्धेशुभंभवेत्।यदातुपुण्यसहमंशुभयुक्तंपापदृष्टंचस्यात्।तदाद्योवर्षपूर्वार्द्धेशुभंस्यात्।परेवर्षस्योत्तरार्द्धेअसत्।अशुभंभवेत्।यदातुपापयुक्तंपापदृष्टंतदासंपूर्णंवर्षंअशुभंभवेत्।यदातुशुभग्रहयुक्तंशुभग्रहदृष्टंचतदासंपूर्णंवर्षपर्यंतंशुभफलंभवेत्।इत्यर्थः।सिद्धं।अथपुण्यसहमप्रशंसामाह।यत्रोदेपुण्यसहममिति।३३॥यत्रोदेयस्मिन्वर्षेशुभंशुभफलजनकंसोदृःशुभावहः।तद्वर्षशुभफलंज्ञेयमित्यर्थः।यस्मिन्वर्षेपुण्यसहमेअनिष्टसति।तदाशुभोनेतिशुभफलंवर्षमध्येनददाति।अतःकारणान्नपुण्यसहमंआदौप्रथमतःविचारयेत्।अथपुण्यसहमस्यजन्मलग्नेत्वनिष्टस्थानास्थितस्याशुभफलमाह।सूतावितिं॥३४॥सूतौजन्मसमयलग्नेषष्टाष्टरिफस्थरिफशब्देनद्वादशस्थानंएतत्स्थानास्थितचेत्पुण्यसहमंभवति।अब्देवर्षेपुणःपापदृतंफलंधर्मार्थसौख्यानांघातकंभवति।सहमान्यखिलानीत्थंसूतौवर्षेचचिंतयेत्।माद्यारिमृत्युनिवृत्त्यादादिशेफलं।अखिलानिसमग्रहाणिसहमानिइहअमुनाप्रकारेणसूतौजन्मलग्नेवर्षेचचिंतयेत्।माद्यरोगः।अरिःशत्रुःकलिःसंकटकःमृत्युःप्रमिद्दः।अशुभलादारिद्र्यसहममपि।अतएवग्रंथकर्त्राग्रेफलंवक्ष्यति।दारिद्र्यमतमाद्यारिकलिउक्ते।विपर्ययइति। एषुत्ययात्।पुण्यसहमाफलात्।विपरीतंफलमादिशेत्।तद्यथा।पुण्यसहमवत्।स्वेछादिसप्तदगतोयदिलग्नदशाएतश्लोकमारभ्यसूतोषष्ठाष्टरिफस्थमित्येतावत्पर्यंतंविचारिक्रियमाणेयदिमाद्यारिकलिमृत्यूनांसहमानांशुभफलमागतं।तदाअशुभफलंवाच्यं।यदित्वशुभफलमागतं। तदाशुभफलंवाच्यमित्यर्थः।अथकार्यसिद्धिसहमस्यशुभाशुभफलमाह।कार्यसिद्धिसममिति।३६कार्यसिद्धिसहमंशुभग्रहैःयुतंदृष्टंमुथशिलंगंवादृष्टंचमुथशिलंचदृष्टमुथशिलगंदृष्टवा।तथाशुभग्रहैःमुथशिलयोगश्चेत्कृतःतदासंगरेसंग्रामजयप्रदं।शत्रुनाशः।स्वात्कर्षश्चभवतीत्यर्थः। अथस्यानंतरंतत्कालेर्थसिद्धिसहमंशुभपापग्रहयुक्तंदृष्टंवा।क्लेशतोबुधैःपंडितैःजयउदीरितःकथितः।अथकलिसहमस्यशुभाशुभफलमाह।कलिसंज्ञामिश्रेति॥३७॥कलिर्नामकटकःतस्यसहमंमिश्रविगैःशुभपापग्रहैर्दृष्टंसंयुक्तंवाभवति।तथायदिपापमुथशिलयोगश्चेद्भवति। तदाकालेःकलहमसंगान्मृतिंमरणंप्राप्नोति।यदिमिश्रदृष्टितःशुभपापग्रहदृष्टिश्चेद्भवति।कलिर्व्यथेकलिश्चव्यथाचकलिर्व्यथा।कलिः

कलहः व्यथादुःखं चतेभवतः। अथविवाहसहमस्यशुभाशुभफलमाह। विवाहसमाधिपतेति॥३८॥ विवाहसहमाधिपेनस्वामिनादृष्टंयुत
वातथानेवासोम्यःशुभग्रहैःदृष्टंयुक्तंवास्यात्। तथाशुभैःमुथशिल्कंशुभैःशुभग्रहकृतमुथशिल्कयोगश्चेत्तदाशुभाग्निंविवाहाग्निंकुर्यात्। यदासिश्र
समेतदृष्टं। मिश्रैःशुभपापग्रहैः युतंदृष्टंवा। चेत्तदाकष्टात्तत्रैवनविवाहाग्निंकुर्यात्। अथक्रूरयापैःविवाहसहमंयुतंदृष्टंवा। मुथशिल्की
कृतंवा। तथामृतीश्वरेणवर्षलग्नाद्विवाहसहमाद्वा। अष्टमस्थानाधीश्वरेणयुतंदृष्टंवामथशिलीकृतंवास्यात्तदातत्तस्मिन्वर्षेविवाहोनैव
भवेत्। अथयशःसहमस्याशुभफलमाह। यशोधिपेति॥३९॥ यशोधिपेयशःस्वामिनिनैधनगेअष्टमस्थानगतेबलेनपापग्रहेणयुतेदृष्टे
वासतिसद्यशसोविनाशःस्यात्। किंच। पापसंबंधेतअर्जितस्ययशसोस्तिलाभः। तद्गेअष्टमस्थितेसति। पुनःनष्टोजसिअस्तंगतेसतिकुलकी
र्त्तिनाशःस्यात्। अथपुनरपियशःसहमस्यशुभाशुभस्यफलमाह। शुभेक्षशालेति॥४०॥ यशःसहमपतिनाशुभेक्षशालेशुभग्रहेणशार्कंमु
थशिल्कयोगेसति। शुभदृग्युतेवाशुभदृष्टेशुभयुतेवासतिबलान्वितेबलिष्टेसतियशसोभिवृद्धिःस्यात्। तथायुद्धजयःस्यात्। तथावाहनानां
गजाश्वादीनांशस्त्राणांचलाभःस्यात्। शयःसहमपतेःपापग्रहेणसहईसराफेयोगेसतिशुभदृग्युतेवाशुभदृष्टेशुभयुतेवासतिअयशो
र्थनाशःस्यात्। अथआशासहमस्यशुभाशुभफलमाह। आशातदीशेति॥४१॥ आशासहमलग्नात्षड्दृष्टरिफविवर्जितः। एतत्स्था
नंनभवति। तत्र यात्तदीशश्चआशासहमाधिपतिश्चएतत्स्थानविवर्जितोभवति। इयमपिसौम्येःशुभग्रहैर्युतमीक्षितंदृष्टंवा। तदावां
छितानामर्थानांसुवर्णादिद्रव्याणांअंबरवस्त्राणांवाहनादीनांलाभःस्यात्। बलेनपापग्रहेणदृष्टयुतेसति। तदावांछितार्थादीनामति
दुःखे। अथरोगसहमसाशुभफलमाह। माद्याधिपेति॥४२॥ मांद्याधिपरोगसहमाधीशस्ययेपापग्रहःपापयुतेक्षितस्यपापग्रहैर्युतंत

दृष्टः। तदासरोगकरोविचिंसःज्ञेयः। चेत्तत्तिषेनलग्नदृष्टमस्थानाधिपतिनासहरोगसहमाधीशोदृष्टशालेमुथशिलंकरोति। तदामृत्युर्मरणं
स्यात्। यदितुतादृशेमाद्यसहमस्वामिनिहीनबलेसति। अतिकष्टान्मरणंभवेत्। अथपुनरपिमाद्यसहमस्यशुभाशुभफलमाह। स्वसा
मीति॥४३॥ माद्येमाद्यसहमेस्वस्वामिनासोम्यग्रहैर्वायदीक्षणंतद्भजतिनादृशेसति। तथायेसर्वार्थेमाद्याधिपरुक्करीस्यासबलेसति। अ
दृष्टषड्दृश्यवर्ज्ये। अदृष्टषड्दृशस्थानस्थिति। हितेसति। तदारोगोनैवभवेत्। यदातुविमिश्रैःशुभपापैर्युतमीक्षितेदृष्टेवासति। किंचिद्रुग्भयं
रोगभयमस्तीतिज्ञेयं। अथार्थसहमस्यशुभाशुभफलमाह। अर्थारक्षति॥४४॥ अर्थारक्षसहमंशुभेनस्वामिनादृष्टयुतंवाचेद्भवति। तदा
द्रव्यागमात्। द्रव्यशस्यकृतासौख्यदं। तदापापग्रहेदृष्टयुतंवा। चेत्तदादृतस्यवित्तस्यविक्रयंनाशंकुर्यात्। अर्थार्थसहमंपापग्रहैः युक्त
दृष्टंचसद्भिःशुभग्रहैःदृष्टंचसवति। तथाशुभेक्षशालेशुभग्रहेणसहमुथशिल्कयागंयशुभंकरोति। तदापूर्वधनंपूर्वसंचितंधनंनाशयेत्।
पश्चादर्थस्यद्रव्यस्यसमुद्भवंसुखसहितंकुर्यात्। व्यासतोव्ययतिअर्थसहमंशुभाशुभैर्दृष्टं। तथातेरेवमुथशिल्कृतं। चेत्तदाशुभफलं
मेवस्यात्। अथशत्रुमित्रफलदृष्ट्योराह। रिपुदृष्टेति॥४५॥ यत्सहमंशुभग्रहेणापग्रहेणवारिपुदृष्ट्याशत्रुदृष्ट्यायदापश्यति। तदारिपोःश
त्रोःसकाशाद्भीतिर्भयंभवेत्। तस्कराद्यैर्धनक्षयः। चार्थेणधनंगच्छतीत्यर्थः। यत्सहमस्यशुभाशुभफलमाह। सत्समीति॥४६॥ पुत्रसम्ब
पुत्रसहमंसद्भिशुभग्रहैःसस्वामिनाचदृष्टंयुतंवा। तदासालयस्यपुत्रस्यलाभपुत्रोत्पत्तिंतज्जनितंसुखंयच्छति। यदिपुत्रसहमंपापान्वितंपा
पग्रहयुतंसौम्यग्रहैःसहेक्ष्यात्करोति। तदाबप्रथमतःपुत्रसंबंधिदुःखंपश्चात्सौख्यायपुत्रसौख्यंभवति। अथपुनःसुतसहमस्यशुभा

शुभफलमाह।पापान्वितमिति॥४७॥यदि पुत्रसहमंपापग्रहेर्युक्तंपापग्रहकृतेसराफयोगमीसेपुत्रसहमाधीशेगतोजसिनिर्बलेअस्तंगतेवास
तितदापुत्रस्यनाशः।अब्दवर्षप्रवेशसमयेपुत्रसहमाधीश्वरःसतोजन्मकालेस्फुतेशः पंचमभावाधीश्वरोभवति।पुनःशुभग्रहैर्मित्रेणाचदृष्टश्चे
ड्भवति।तदापुत्रस्यमध्येप्राप्तेभवति।अथपित्रसहमस्यशुभाशुभफलमाह।पित्र्यमिति॥४८॥पित्र्यंपित्र्यसहमंसशुभग्रहैरीक्षितंदृष्टंयुतंवा।
अथवास्वामिनायुक्तंदृष्टंचसतंतातस्यपितुःधनंवरमानसौख्यंयच्छति।यत्योपित्रसहमस्वामिनिगतोजसिनिर्बलेऽस्तंगतेस्फुटोलग्नाद्दृष्ट
मस्थानस्थितेसतिखलेनकृतमुसरिफयोगेचसति।तत्रापिचरराशिस्थेमेषकर्कतुलामकरराशिस्थेसतिपितुःपरदेशयानात्परदेश
यात्रायांसत्यांवाशोमारणंभवेत्।अथपुनरपिसहमस्यशुभाशुभफलमाह॥शुभेक्षशालेति॥४९॥पित्रसहमस्यशुभग्रहकृतेक्षशालयोग
श्चेद्भवति।पुनःपापग्रहयोगश्चेद्भवति।तदाग्रहपित्रहथमंवर्षपूर्वोद्भिगदस्यरोगस्यप्रकोपोक्षिदृष्टिःमहात्स्यात्।पश्चाद्दर्षेनरोदुःखंविंदति॥
प्राप्नोतिरोगरहितोभवतीत्यर्थः।नाथेपित्रसहमस्वामिनिदृष्टिःपूर्ववीर्येपंचदशविंशाधिकबलेसतिनरपात्।राज्ञःसकाशात्मानयशोभि
दृष्टिःस्यात्।अथबंधनसहमस्यशुभाशुभफलमाह।बंधनाख्येति॥५०॥बंधनसहमंस्वामिनायुतेक्षितिदृष्टंवा।तदाबंधनंकारागृहप्राप्ति
र्नास्ति।पुनर्बंधनसहमस्यतत्स्वामिनोवा।पापग्रहकृतोमुथशिलयोगश्चेत्तदाविशेषितोबंधनमस्ति।अथगोरवसहमस्यशुभाशुभफलं
माह।गोरवाख्यामिति॥५१॥गोरवसहमंस्वामिनाशुभग्रहेर्वायुतंदृष्टंवातदासुखाप्तये।सुखप्राप्तिःस्यात्।राजगोरवसहयशः भवराशि
तेषांप्राप्तिः।गोरवसहमंपापग्रहैःदृष्टंयुतंवातदापदस्याधिकारस्यक्षतिःनाशःस्यात्।अथपुनःगोरवसहमस्यशुभाशुभफलमाह॥शु
भाशुभोरिति॥५३॥गोरवसहमंशुभपापग्रहैर्दृष्टंयुतंतातदाखलैःपापग्रहैश्चेत्।कृतमुथशिलंतदापूर्ववर्षपूर्वोद्भिधननाशंमाननाशंवि

धत्ते।करोति।चरमेवर्षस्योत्तरार्द्धेगोरवसहमंशुभग्रहकृतमुथशिलंचेत्तदासुखंवाहनशस्त्रलाभंचविंदते।अथकर्मसहमस्यशुभाशुभफलमाह।कर्मभा
वेति॥५३॥कर्मभावश्चकर्मसहमंचनयोःचाधियोकर्मभावाधिपःकर्मसहमाधिपश्चएतेचत्वारोबलान्विताःशुभैःशुभग्रहैःस्वामिनाचकृतमुथशिलाः
तदाहाभवजिगजभूमिलाभदाःस्युः।एतेकर्मभावसहमाधिपाः।तदाशुभदाः।अथपुनरपिकर्मभावसहमाधिपानामशुभंफलंचाह।दग्धावक्रारिति
५४ कर्मभावसहमाधिपाःदग्धरस्तगताःवक्रगतित्वंतदाकर्मवैकल्यदा।कर्मणःप्रारब्धशुभकार्यस्यवैकल्यंमनिष्पत्तिः।तांददातितादृशाःस्युः।
तेकर्मभावसहमाधिपाःसौरिणाशनैश्चरेणादृष्टायुतावातदाविशेषात्।अवश्यमेवकर्मवैकल्यदाःस्युः।राजकर्मेशोराजसहमेश्वरकर्मभामेश्वरो
खलेनपापग्रहेणकृतमूसरिफोकृतमूलुरिफयोगोचेत्तदाराज्यभ्रंशोराज्यनाशःकर्मनाशश्चाप्रारब्धशुभकार्यस्यनाशःस्यात्।अथवेषांवि
त्तंदग्धार्थनांसहमाभामर्थमाह।उपदृष्टेति॥५५॥तत्रप्रथमतःगुरुसहमेगुरुशब्देनबृहस्पतिपित्रूपदेशवाचकोस्ति।तत्रग्रामनिर्णयमाह।गुरु
शब्देननअध्यापकरुच्यतेतत्रबृहस्पतेस्तावत्सहमानयनेप्रयोजनंनास्ति।पितुःसहमंग्राथम्येनाभिहितंपरिशेषंदुपदेष्टवसमायाति।विद्या
सहमशब्देनज्ञानं।शास्त्रंशब्देनश्रुतिस्मृतीउच्येते।ताद्दशब्देनमाह।अज्ञानमितियावत्।बलशब्देसैन्यंदेहशक्त्योःप्रसिद्धिः।अत्रतदर्थेनिर्ण
यमाह।बलशब्देनसैन्यं।देहशक्तोतुसामर्थ्यसहमोक्तेः।देहशब्देनांगशरीरमितियावत्।जल्पशब्देनद्युतिः।कांतिरितियावत्।मुक्तादोतथाप
लंभात्।यथाश्रुतव्याख्यानेतुपुनरुक्तिः।अथगुरुशब्दानुभावप्रत्ययोस्तोसस्यागुरुनागोरवशब्दयोर्निष्पत्तिः।अनयोरर्थस्यैकत्वात्तदर्थकस
हमकथमनुचितमितिमतिमत्तानयोर्मतमाह।गुरुतेति॥५६॥अत्रतुलोकप्रसिद्धिः।शरणंगुरुशब्देनमंडलेशत्वंदेशस्वामित्वंगोरवशब्देनमा
नसाहितप्रतिष्ठाधिक्यंअथशमशब्दःचंद्रक्षत्रियभूमेषुप्रसिद्धोस्ति।तदर्थनिर्णयमाह।निग्रहेत्यादिअर्द्धेन।अत्रहिलोकप्रसिद्धाशावश

देनरश्वीश्वरएवोच्यते।तल्लक्षणमाह।निग्रहेतिनिग्रहेनामाष्टनिकरणं।अनुग्रहोनामन्यायस्येष्टकरणं।तयोर्विभुःसामर्थ्यःकीदृशी।छत्रादि
लिंगाक्।प्रछत्रैसिंहआदिशब्देनमामरमित्यादियलिंगंचिन्वन्तद्वाकमजतीति।अथमाहात्म्यसामर्थ्यशौर्यात्सामर्थमाह।माहात्म्यमि
ति।५७॥महतोभावःमाहात्म्यमहत्त्वंच।मंत्रगामीर्यंमंत्रः।एकांतेकृत्यविचारः।तस्यगामीर्यमप्रकाशता।नचप्रकाशःकथंभवत्यतआह॥
धृतीतिधृतिःधैर्यबुद्धिः।परिणामजाप्रज्ञा।आभ्यांशाल्तेतच्छालियुक्तमित्यर्थः।अस्यभावःशालिता।एतदयंमाहात्म्यमित्यर्थः।सामर्थ्य
शब्देनदेहजाशक्तिः।सौर्यशब्देनशत्रुनिग्रहेयत्नः।आशेति॥५८अशशब्देनेछाउक्ताश्रद्धाशब्देनधर्म्यामतिः।वंशब्देनपराश्रयः।परिधान
ता।यानीयपतनशब्देननष्टिः।अथवाअकस्माज्जलेमज्जनं।आधिव्याधितायमाद्येसति।५९॥तापसंतापशब्देनआधिःव्याधिशब्देनशरीर
पीडाकष्टं।वृंदशब्देनमपिंडस्मृतः।वणिकशब्देनसस्यालीकंवृत्तिः सत्यासत्यवस्तुजीविते।प्रभवशब्देनआधानंदासत्वंपरिकर्मेक्तिमन्यत्स्पष्टं॥
स्वनामतरिति॥६०॥परकर्मशब्देनदासत्वमन्यसहमानिस्वनामतस्पष्टानिकुलजातिस्वरूपतः।तथायोग्यनिरूप्याणि।शुभेति।६१॥यत्सहमं
शुभयहयुतंदृष्ट्वा।तदासौख्यंवसुवार्यानुसारतः।सहमस्वामिनायादृशबलंतादृशंतत्सहमजनितसौख्यंज्ञेयं।यद्यथा।यदासहमस्वामी
बलिष्ठः।तदामहत्सौख्यंयदामध्यबलः।तदामध्यमंसौख्यं।यदाहीनबलः तदासुखाभावः।दारिद्र्यमतिमाद्यारिकलिसूक्तोविपर्ययः।एत श्रीः
त्सहमानांफलंविपरीतंज्ञेयं।तद्यथा।यदाशुभफलमागतंतदाशुभंज्ञेयं।यदात्वशुभफलमागतंतदाशुभंज्ञेयं।जन्मपत्राप्तावशुभाशुभस ३६
हमविचारः।केनोपायेनस्यादित्यतआह।प्रश्नकालेपिसहमंविचार्यं।प्रष्टुरिच्छया।सर्वेषामुपयोगोत्रचित्रं।पृच्छतियज्जनाः६२॥प्र
श्नकालेपिसहममितिज्ञात्वाभिप्रायेनैकवचनं।सहमानीत्यर्थः।तानिगुणादीनिसहमप्रश्नकालेनुरिच्छयाविपर्ययाणि।अत्रसर्वेषांसहमाना

मुपयोगः।यतोजनश्चिंतंपृच्छति।अथदशानयनमाह।तत्रादौकक्षांशसाधनमाह।स्फुटासल्ग्नानिति।६३॥वर्षप्रवेशसमयेस्पष्टान्सल्ग्नान्ग्र
हान्विधाय।राशीनत्यल्पकांशादयः।सर्वस्थाप्याः।तत्राल्पलवः।तेषांमध्येन्यूनांशोग्रहःपूर्वस्थाप्यः।तस्मादधिकाधिकांशकमानिवेश्य।त
द्यथा।यथा२यस्य२ग्रहस्यांशाद्याधिकातथा२स२ग्रहःसल्ग्नेनिवेश्यःस्थाप्यः।कमादयं।अहेदशाक्रमःस्यात्।अथयातांशसाधनमाह।
उनंविशुध्यतिइतिसल्यंअंशाद्यंग्रहमधिकतोधिकांशाद्धरात्।क्रमेणविशोध्ये।तद्यथा।प्रथमंयथाहिताएवस्थाप्याः।ततःप्रथाद्वि
तीयात्तृतीयादित्याक्रमेणशोध्या।तदेतत्रंशुद्धांशकशेषंक्रयं।परस्परशोधनेकृतेयेऊर्वतिताअंशास्तेषांएक्यकार्यंतत्सर्वग्रहमध्येयोधि
कांशोतिमग्रहः।तत्तुल्यमेवस्यात्।इतिव्याप्तिः।पश्चादनेनशेषांशयोगेनवर्षमिति।सौरी॥३६०सावनीवा३६५॥१५॥३१॥३०॥भाज्यायं
लब्धंसधुवांकःस्यात्।अथदशादिवसानयनमाह।अनेनशुद्धांशकास्तान्गुणयेदनेनलब्धध्रुवांकेनभवेद्दशायाः।मानंदिनाद्यंविलग्नद्
हस्यफलान्यथासानिगदेन्नशास्त्रात्।अनेनलब्धध्रुवांकेनसर्वेपिशुद्धांशकाःगुणनीयाःएवंकृतेसति।तत्तद्ग्रहस्यदिनादिकंदशायाप्रमा
णंभवेत्।एवंदशादिनान्यानीयशास्त्रात्फलानिशुभाशुभानि।गदेत।अथांशसाम्यनिर्णयमाह।शुद्धांसेति।४द्वयोरंशेसाम्येसभत्वे
सतिबलिनःपंचवर्गबलाधिक्यात्प्रथमादशास्यात्।बलस्यसाम्येल्पगतेःन्यूनगतेःपूर्वादशाज्ञेया।विलग्नस्यचांशसाम्येकस्यप्रथमं
दशा।तद्वाहसाम्यमिति।खगेणग्रहेणविलग्नस्यसाम्येऽर्थादंशोःसाम्येबलादिकोवाजगत्यादिकाचिंत्य।लग्नपतेर्लग्नपतिसंबंधिनोवो
ध्योःस्यर्थः।सौरदशायांवर्षप्रवेशसमयेवप्रथमंसौरदशाप्रवेशःतदोवर्षप्रवेशकालीनस्पष्टसूर्यलग्नेःप्रथमदशादिनादि।प्रथमदशा
दिनादि।प्रथमदशाप्रथमदशाप्रवेशकालीनस्पष्टसूर्ययोज्यं।तद्यथा।सूर्यस्यअंशस्थानेदिवसायोज्यं।कलास्थानेघटिकायोज्याःविकला

स्थानेपलानियोज्यानिविकलाःषष्ट्याभक्तालब्धंकलासत्योज्य।कलाःषष्ट्याभक्तालब्धंअंशेषुयोज्यं।राशयोद्वादशाधिकास्तद्द्वादशभिस्त्यक्ताःशे
षंराशयः।तादृशिसूर्येद्वितीयदशाप्रवेशः।एवंद्वितीयदशाप्रवेशकालीनसूर्यतुल्यद्वितीयदशादिनादियोज्यं।तादृशिसूर्येतृतीयदशाप्रवेशः।
एवमग्रेपि।एवंयोजनेवर्षप्रवेशकालीनसूर्यतुल्यरंतिमसूर्योभवति।तदासौरदशाक्रमः।शुद्धोन्यथाऽशुद्धेति।अथसावनदशायासर्वप्रवेश
समयेसावनप्रथमदशाप्रवेशः ततोवर्षप्रवेशसमयेवारादौप्रथमसावनदशादिनानियोज्यानितस्मिन्नासेतावतिवारादौद्वितीयदशाप्रवेशः।ए
वंद्वितीयदशाप्रवेशवारादिकंआयाति।तदादशाप्रवेशःशुद्धः।अन्यथाशुद्धःउदाहरणं।शनिःसर्वापेक्षयान्यूनांशः।अतःराशिंत्यक्त्वाप्रथमं
शनिःस्थापितः६।४८।५४।ततोर्कः७।३०।६।ततोबुधः१२।१६।८।ततोभौमः१४।३२।३६।ततोलग्नं१८।३।५४।तत्रश्वेदृः।
१२।९।४७ ततःशुक्रः२४।३१।४८।ततोगुरुः।२९।३५।१३।अथप्रथमंयथास्थिताःशनियात्यांशाः६।४८।५४।एतेरविहीनांशाः।
१।३०।६।।मध्येशोधितोजाताःरवियात्यांशाः ०।४१।१२।एवंपूर्वशाअग्रिमाग्रिममध्येशोधिताःसर्वेषांजाताःपात्यांशाः बुधः४।४६।
२भौम२।१६।१८।लग्न३।३१।१८।चंद्रः४।५।५३शुक्र२।२२।१।।गुरुः५।३।३५।।एतेषांयोगः।२९।३५।।१३।।अनेनवर्षमिति।३६०
षष्टिसवलितं१२९६००भाज्यंपात्यांशषष्टिगुणितं१०६५१३हरःभक्त्याजातोगुणकः१२।१०।१०।३अनेनशनेःपात्यांशाः६।४८।५४
गुणितानिदशनिदशादिनानि८२।५५।५७।।अथवापात्यांशयोगेन२९।३५।१३।वर्षमिति३६५।१५।३१।३०।।भक्तोजातोगुणकः१२।
२०।४२।अनेनशनिःपात्यांशाः६।४८।५४।।गुणिताजातानिशनिदशादिनानि।८४।७।५२।।एवंजाताःसर्वेषांहीनांशाःपात्यांशाःसौरसा
वनदशादिनानिलिख्यंते।अथांतर्दशानयनमाह।दशामानंप्रकल्योक्तेनवर्त्मना।अंतर्दशासाधनीयाप्राक्त्यांशावशेनतुआसावंतर्दशामा

	योगः	हीनांशाःपात्यांशाः	दिवसादिदशाअंतर्दशावेशभुक्तिशेषाः
चं	३६०।०।०।०	५	० ० ०
सू	३५९।५९।५९	३७	० ० ०
बु	३५९।५९।५९	४५	० ० ०
मं	३५९।५९।५९	४७	० ० ०
लग्नं	३५९।५९।५९	३०	० ० ०
चं	३५९।५९।५९	४८	० ० ०
शु	३५९।५९।५९	४८	० ० ०
गु	३५९।५९।५९	५४	० ० ०
शु	३५९।५९।५९	१३	० ० ०
चं	३५९।५९।५९	२५	० ० ०
लग्नं	३५९।५९।५९	२७	० ० ०
मं	३५९।५९।५९	७	० ० ०
बु	३५९।५९।५९	४१	० ० ०
सू	३५९।५९।५९	२३	० ० ०
रा	३५९।५९।५९	४८	० ० ०

कर्यतेतत्क्रमतोपरा।अस्यस्पष्टार्थः।यस्यग्रहस्यमध्येनदशाक्रियतेतत्स्यदशामानं।दिनघटीपलात्मकंतदेवसमानंप्रकल्योना।।अंतर्दशासाध्या।उदाहरणं।शनिदशापूर्वमानीतायासा८२।५५।१७।पात्यांशयोगेन२९।३५।१३।भक्तोजातोगुणकः२।४८।८।अनेनशनिपात्यांशगुणिताःजातानिशनिदशामध्येशनेरंतर्दशादिनानि१९।६।४८।एवंजातानिशनिदशामध्येसर्वेषामंतर्दशाःकोष्ठकेषुलिखिताः।तेनगुणकेन।२।४८।।८।।रविपात्यांशाःगुणनीयाःषष्ट्याहृताब्धांशनिदशायांरवेरंतर्दशा१।५५।२७।अथमासप्रवेशदिनप्रवेशानयनमाह।एकेकराशिहृद्यंचेत्तुल्यांशाद्येयदारविःतदामासप्रवेशायुप्रवेशश्चैकलासमः१जन्मकालिनासूर्यायादशाराशादिभवति।सएकादशास्थानेस्थाप्यः।एकद्व्यादिराशिषड्यायुक्तोयथावस्थितांशादितुल्यामस्मिन्मासघटीपलात्मिकांकालेभवकालेभवति।तदांतत्संख्याकोमासप्रवेशज्ञः।एतदुक्तंभवति।प्रथममासप्रवेशस्तद्वर्षप्रवेशएवजातः।तत्रजन्मार्कतुल्यएवाऽर्कोऽस्ति।जन्मसूर्यएकराशियाति

ततनुल्यसूर्ययद्दिनेतस्मिन्समयेनत्रद्वितीयमासप्रवेशोभवति। एवमग्रेबोध्यंयं। दिनप्रवेशश्चेक्रियतेतदैकांशसंयोजनात्कलाविकलासमस्तं यस्मिन्समयेतदाद्युप्रवेशोभवति। अथपंचाशान्मासप्रवेशघटिकाद्यानयनं। मासार्कस्यतदासन्नयंत्यर्कणसहांतरं। कलीकृत्यार्कगत्यासंदिना द्येनयुतोनितं। तत्रैक्यिस्थंवारपूर्वमार्कधिकहीनकं। तद्वाराद्येमासप्रवेशेद्युवेशोयेवमेवच। एकेकराशियोगेनजातोमासप्रवेशार्कः। अथस न्नपंचांगस्थितयद्यवध्यर्कः। तदवधिस्थार्कमासप्रवेशार्कयोरंतरंकार्यं। तस्यकलाः कार्म्माः। अवधिस्थार्कगत्याभाज्याः। फलंदिनाद्यंनिस्थ वारघटीपलात्मकंयाद्यं। तत्फलमवधिस्थमारादौयुतोनितंकार्यं। तद्यथा। अवधिस्थार्कतः। मासप्रवेशार्कोधिकश्चेत्तदा अवधिस्थार्कवा रादौयुक्तंकार्यं। न्यूनेहीनंकार्यं। तस्मिन्चाद्यवारघटीपलात्मकेकालेमासप्रवेशोभवति। एवमनयारीत्याद्युवेशेदिनप्रवेशोज्ञेयः। अवधि स्थवारादौवित्यत्रअवधिस्थाघटिकाः। नद्याद्याः। कुतः। यद्ग्रामस्थचरदेशांतरसंस्कारस्यकृतत्वादितिकारणात्। अवधिस्थवारादावपीचस स्कारहितोवारघटीपलात्मकोऽदृश्याद्यः। यथा। यत्राद्यंस्थादंचांगस्थितः सूर्यः साधितः। तस्माद्यंस्थाददृश्यः साध्यः। पंचतावान्विशेषः। यदि ग्रंथादावदृश्याऽदृश्यांतरभुजफलचरसंस्कारश्चेत्कृतोभवति। तदासंस्कारहीनोदृश्यः कार्यः। यथारामविनोदस्थादृश्यंग्रंथादौऽदृश्यांतरभुजफल काशीस्थचरसंस्कारःकृतोस्तीतिकारणात्संस्कारेणरहितोदृश्यः कार्यः। तदनंतरमस्मिन्संस्काररहितोदृश्ययस्यमासप्रवेशइक्रियतेतस्य यद्ग्रामेजन्मतद्ग्रामवरदेशांतरमृदयांतरभुजफलसंस्कारः कार्यः। सादृश्यःसूक्ष्मोभवति। परंतुतत्कारचतुष्टयमध्ये। जन्मकालीनसूर्ययावद्भिःसंस्कारैःसंस्कृतोभवति। तावद्भिःसंस्कारैरदृश्यःसंस्कार्यः। तदनंतरंमासप्रवेशार्कअवधिस्थार्कयोः। अंतरात्तयत्सूर्वानीतवारादिकं। तद स्मिंनदृश्येऊनरीत्यायुतोनकार्यतां। मासप्रवेशेसूक्ष्माःघटिकाःभवंति। यद्दिजन्मकालीनःसूर्यरामविनोत्साधितोभवति। पंचांगस्थितावधिस्थार्कोपिरामविनोदात्साधितोभवति। अथवाजन्मकालीनतथावधिस्थार्कयोःसाधनंमकरंदाच्चेत्तंभवति। तदासूक्ष्मघटिकाःभवंति। ग्रंथभेदे स्थूलघटिकाःभवंति। अत्रोदाहरणं। ग्रहलाघवाज्जन्मकालीनःस्पष्टार्कः। २। ७। ३०। ६॥ एकराशियुक्तःजातोद्वितीयमासप्रवेशार्कः। १०। ७। ३०। ६ अस्यासन्नफलगुणकृत्व९नवमीभंगोरामविनोदस्थपंचांगेस्थितावधिस्थार्कः। १०। १०। १। ३८। अनयोरंतरं०। २। ३१। ३२॥ अस्यफलाः १५१। ३२। अवधिस्थार्कगतिकलाभिः ६०। ३१॥ मत्याःसवर्णितोभाज्यभाजकोभाज्यं९०९२भाजकः भाजकः ३६३१भाजकेनहतेभाज्यफलंदिनघ टीपलात्मकं २। ३०। १३। अथरामविनोदस्थपंचांगस्थितग्रहसाधनं। अदृश्यानयनंभूः १पंचचंद्राः १५कुगुणाः ३१कुरामाः ३१सिद्धा २४गताब्दाः गुणिताःसमेताः। खेनाब्धिइंदवः २४गुणल्लोचनेश्व २३तप्तानंगो ७रर्कमुखाःदृश्याः स्यात १यस्मिन्वर्षेरामविनोदःकृतोऽस्ति। तद्वर्षशक १५१२ अथाभीष्टशकमध्ये १५५० शोधितःशेषंगताब्दाः ३८ अयमंकः १। १५। ३१। ३१। २४ गताब्दगुणितोजातो ४७॥४९। ५१। २॥ १२॥ एतन्मध्येअ यंक्षेपोयोजितोजातः ४८। १४। २०। ५३। १२॥ तदनंतरक्षेपक ७। २४। २३॥ अयंक्षेपः युक्तः कार्यं। उर्ध्वाकेसप्ततष्टजातोदृश्यः ६। १४। २०। परं तुएतन्मध्येऽदृयांतरभुजफलचरसंस्कारः कृतोस्तीतिकारणात्। एतन्मध्येसंस्कारैः रहितः क्रियते। नत्रोदोऽदृयांतारसाधनं। ग्रंथोदोशकः। १५१२ तस्मिन्शकेमेषसंक्रांतिसमयसूर्यः। ०। ०। ०। ०। अयनांशाः १६। २१। ५४। ब्रह्मतुल्यात्साधितः। उदयांतरपलात्मकंकृतंऋणं १३ग्रहाणे क्षयादृयेविपरीतमित्युक्तत्वाज्जातंधनं १३इदमदृश्येऊनंजातोदयांतररहितोदृश्यः ६। ४८। ८। अभुजफलमाह। सूर्यांशमदफलंधनं २। ७। अ स्यफलाः १२७। भाजकेनभक्ताः ३६० लब्धंघटिकाद्यंभुजफलंधनं ०। २१। विपरीतमित्युक्तत्वाज्जातंऋणं ०। २१। इदमुदयांतरसंस्कृतादृश्येद्यू युतंजातोदयांतरभुजफलंसंस्कृतोदृश्यः ६। १४। २९। अथचरसंस्कारमाह। काशीयपलभा ५। ४५ चरखंडानि ५७। ४६। १९। चरऋणंपलात्मकं ३१

नीता-उ-
२५

श	र	बु	मं	ल	चं	शु	गु	एक्यं०
१९	०	१३	६	९	११	६	१४	८२	०
६	५५	२१	२२	५२	१९	३७	२०	५५	०
४८	२७	३२	४	६	९	५७	२	२७	०
०	९	९	२७	२७	२७	२१	२१	०	०
७	२६	२८	२१	२८	२८	९	२६	२५	०
३०	३६	३२	५३	३६	८	३७	२५	२५	०
६	२४	२१	१३	१७	२३	२४	२१	२३	०

विपरीतमित्युक्तलाञ्जातंधनं ३१६रमुदयांतरभुजफलसंस्कृतोदृग्ये६।१४।२१॥रहितंजातःउदयांतरभुजफलचरफलसंस्कृतोदृग्यः६।१३।५८॥अनयारीत्यासंस्काररहितोदृग्यः।उदाहरणप्रदर्शनार्थं।एतवारप्रदर्शितं।अथगमोपायःकथ्यते।पूर्वग्रंथादौउदयांतरभुजफलमानीतंतेषांत्रयाणांपरस्परंसंस्कारेरूनेसति।त्रयोविंशति २३पलानिऋणानिजातानि।एतानिस्थिराणि॥अशीष्टवर्षपूर्वोक्तश्लोकेनादृग्येऽभ्येत्साध्यते।तदातस्मिन्नदृग्यपलेषुत्रयोविंशति २३पलानिरहितानिकार्याणि।अशीष्टवर्षशोदृग्यःसंस्काररहितोभवति।यथापूर्वानीतोदृग्यः६।१४।२१॥अयंत्रयोविंशतिपलैःरहितःऋतंजातोपूर्वानीतसंस्काररहितादृग्यतुल्योदृग्यः६।१३॥५८।अथवारामविनोदस्थपंचांगेअशीष्टवर्षसंस्कारत्रयरहितादृग्यानयनमाह।अष्टोध्वतोशून्यखेः २०७ विनघ्नाभुनर्मनघ्नं १४ गतवर्षवृंदं।शराब्धिभक्तं ४५ घटिकादिलब्धयुतंनभोश्वाग्नि ३२०। युतात्वखेभैः ८००।१।हृताद्दिनाद्यंगतवर्षयुक्तंसमाधतंमेषमुखोदृग्यःस्यात्।यस्मिन्वर्षे रामविनोदश्लोकनस्तस्मिन्नूवर्षशकः १५१२॥अयमिष्टशकमध्ये १५५० शोधितेजातानिगतवर्षाणि।३८।३८॥अयमेकोगुणितोजातः १८६६ गतवर्षगणः ३८ चतुर्दश १४ भिःगुणितः ५३२ अनेन ४५ भक्तः फलादि ११ ४९ इदंपूर्वांकमध्ये ७८६६ युतं १८६६।११।४१॥अस्मिन्नूर्ध्वांकेगतवर्षाणि ३२ युतानि ४८। गतअयमेको ३२० योजितः ८१८६।११।४१॥अष्टशत्वे ८०० भक्तंफलंदिनघटीपलात्मकं १०।१३।५८। अस्योर्ध्वांकेगतवर्षाणि ३२ युतानि ४८। १३।५८ समनष्टानिशषांकप्रमितोजातोदृग्यः६।१३।५८।जन्मकालीनसूर्यमध्येचरदेशांतरसंस्कारःकृतोस्तीतिकारणादस्मिन्नूशब्दोयस्वदेशी

यचरदेशांतरसंस्कारःक्रियते।अवधिस्थार्कोचरंपलात्मकंधनं १६ षष्टिभक्तंजातंघटिकाद्यं।१।१८॥विपरीतमित्युक्तलाञ्जातंऋणं १।१८ इदमदृग्ये ९।१३।५८।रहितंजातश्चरसंस्कृतोदृग्यः६।१२।४०।देशांतरेयोजनानि ३० चतुर्थांशोनिजातानिपलानि २२ विपरीतमित्युक्तलाञ्जातानिऋणानि २२ एतानिधरसंस्कृतायेरहितानिजातश्चरसंस्कृतःस्पष्टोदृग्यः६।२२।१८॥अवधिस्थार्कोमासप्रवेशार्कयोरंतरात्पूर्वसाधितवारादिकमिदं २।३०।१३॥अवधिस्थार्कतःमासार्कस्यन्यूनस्पष्टादृग्ये६।१२।१८॥रहितंजातोमासप्रवेशार्कयोरंतः ३।४१ पर्वजाताःफाल्गुनकृष्णषष्ठ्यां मेद्वितीयमासप्रवेशस्थूलघटिका ४२।५ कुतेः।ग्रहलाघवाज्जन्मकालीनसूर्यः।साधितोस्तिरामविनोदस्थपंचांगस्थितावधिस्थार्कोगृहीतोस्ति।एकग्रंथादुभयोःसाधनंक्रियते।तदासूक्ष्मघटिकाःभवंति।अतएवाविचार्यग्रंथभेदसंतिसंस्कारभेदंदेसंति।पंचांगोपायेशीघ्रमासप्रवेशानयनंसर्वैःक्रियते।तदशुद्धं।अथसूक्ष्मघटिकानयनमाह।यस्माद्ग्रंथाज्जन्मकालीनसूर्योयावद्भिःसंस्कारैः।तस्माद्ग्रंथान्मासप्रवेशादिवसेसूर्यःसाध्यः।मासप्रवेशदिवसज्ञानंपंचांगोपरिज्ञानुमानेनज्ञातुंशक्यते।जन्मकालीनसूर्यैकराशौयोजितेजातोमासप्रवेशार्कः।मासप्रवेशदिवसेसूर्योयत्साधितोभवति।तयोःमासप्रवेशार्कयोःरंतरंकार्यं।तस्यकलाःकार्याः।मासप्रवेशदिवसेसूर्योयःसाधितोभवति।तस्यगतकलाभिःभाज्यंफलंदिनघटीपलात्मकंयाचंताः।मासप्रवेशेसूर्योघटिकाःभवंति।उदाहरणं॥ग्रहलाघवोज्जभकालीनचरदेशांतरसंस्कृतःस्पष्टोर्कः।९।१।३०।६।एकराशियुक्तोजातोद्वितीयमासप्रवेशार्कः १०।१।३०।६॥कार्यगुणकृष्णषष्ठ्यांमेग्रहलाघवाद्ग्रहगणचक्रं ९ अहर्गणः ३६२४ सूर्योदयेमध्यमो १०।५१।१।५५ देशांतररविकलाः २२ युक्तः १०।५१।२३ मंदकेंद्रं ४।१२।५१।५३ मंदफलंधनं १।३५।४१॥संस्कृतोर्कः १०।६।४४।३६ चरधनं १०१४ संस्कृतोजातोमासप्रवेशदिवसेस्पष्टार्कः १०।६।४५।३० स्पष्टार्कगतिः ६०।३५॥

नी.ता.उ. ८०

उभयोरंतरं०।०।४४।३६ अस्यकलाः४४।३६ गतिकलाभिः६०।३५भक्ताःसवर्णितौभाज्य२६७६भाजकौ३६३५भजनालब्धंदिनंघटीपलात्म
कं०।४४।१०एवंफाल्गुनकृष्णषष्ठ्यंतेमेमसूर्योदयाद्गतघटीषु४४पले१०सज्ञातोद्वितीयमासप्रवेशः।अनयारीत्याचैत्साध्यते।तदामासप्रवेशसूक्ष्म
घटिकाःभवंति।अस्मिन्नमयेसूर्य१०।७।३०।६।अयंपूर्वतुल्योज्ञातः।एवमग्रेपिबोध्यं।अनयारीत्यादिनग्रहप्रवेशः साध्यः।सासदिनग्रहप्रवेशसम
येग्रहभावाःसाध्यः।पंचवर्गबुल्लादिकंविचार्यं।अथग्रंथालंकारस्तत्रापितामहवर्णनमाह।आसीदशीमगुणमंडितपंडिताग्न्योव्याख्यद्भुजंग
पदवीःश्रुतिवित्कृवृत्तः।साहित्यरीतिनिपुणोगणिनागमज्ञश्चिंतामणिर्विपुलगर्गकुलावतंसः६३ चिंतामणिः चिंतामणिसंज्ञाआसीत्कथंभू
तः।आसीमगुणमंडितपंडितपंडिताग्न्यः।आसीमानिर्मर्यादायेगुणाःसाधुत्वादयः।तैर्मंडिताभूषिताःयेपंडिताशास्त्रज्ञास्तेषामग्न्यःश्रेष्ठः
कथंभूतःभुजंगपदवीःभुजंगयःशेषः।तस्यगाःवाण्यःमहाभाष्यरूपाःव्याख्यानमहाभाष्याध्यायनेत्यर्थः।पुनःकीदृशः।श्रुतिविद्वेदविद्या
मर्मज्ञः।सद्वृत्तःसमीचीनाचरणः।यथाकालविहितश्रौतस्मार्तकर्मानुष्ठानशीलःसाहित्यरीतिनिपुणः।अलंकारज्ञानविषयेअतिपंडितः
गणितागमज्ञः।ज्योतिःशास्त्रज्ञः।विपुलगर्गकुलावतंसः।अथपितृवर्णमाह।तदात्मजोनंगुणोस्यनंतोयोधोकमृदुःकीःकिलकामधेनुं श्रीः
मनुष्येजातकपद्धतिंचनिरूपयद्दृष्टमनंतनिरस्यं॥ ७ ॥ ७॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ४०
इतिश्रीनीलकंठविरचितासंज्ञातंत्रेसहमाध्यायस्यव्याख्योद्धृतिःसमाप्तिमगमत्।।संवत्नशके१६८२विक्रमनामसंवत्सरेअधिकश्रावणे
मासिशुक्लपक्षेद्वादश्यांतिथौगुरुवासरेतद्दिनेपांडवकृज्योतिषोपनामकमहादेवाख्योऽरिष्टवसुभं।। ॥श्रीकृष्णार्पणमस्तु॥ ॥
॥यादृशंपुस्तकंदृष्ट्वातादृशंलिखितंमया॥यदिशुद्धमशुद्धंवाममदोषोनविद्यते॥ ॥श्रीगोपालोविजयते॥ ॥ ७ ॥ ॥७॥७

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

नीत-उ-
१

नीत कंठी उदाहरण

अंतरजालवार्थ १३।२०

॥गतघटीभिरथोंतरजावधिनिरुतानिरवलेर्घघटाहृता॥०॥
॥लवमुखेनयुतोगतरक्वरातदपिवक्रगतेरहितस्फुटा॥०॥

DR BHAU DAJI MEMORIAL